भक्षयुग्मं ततोच्चार्यं शोणितं पिब-युग्मकम् ।
वगलामुखि[1] उच्चार्य[2] वगलाबीजमुच्चरेत्[3] ॥७॥
'शक्ति वाराहमुच्चार्यं वर्मास्त्रं च समुद्धरेत्'[4] ।
'त्रिचत्वारिंशद्वर्णयुक्तं'[5] वगलायाः[6] सुपावनम् ॥८॥
दुर्वासा[7] ऋषिरेवात्र[8] छन्दोऽनुष्टुप् भवेच्छुभम्[9] ।
देवता वगलानाम्नी[10] जगद्व्यापकरूपिणी ॥९॥
ग्लौं[11] बीजं ह्रीं च शक्तिश्च फट्कारं कीलकं तथा ।
'मंत्रराजेन देव्याश्च'[12] न्यासविद्यां समाचरेत् ॥१०॥
ध्यानभेदं[13] प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ।
चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ॥११॥
जिह्वां खड्गं पानपात्रं गदां धारयन्तीं पराम्[14] ।
पीताम्बरधरां देवीं पीतपुष्पैरलङ्कृताम् ॥१२॥
बिम्बोष्ठीं चारुवदनां मदाघूर्णितलोचनाम् ।
सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ॥१३॥
भजेऽहं चास्त्रवगलां सर्वाकर्षणकर्मसु ।
एवं ध्यात्वा जपेन्मन्त्रं बाणलक्षं कुमारक ॥१४॥
तर्पयेत्तद्दशांशं च जपासंमिश्रवारिणा[15] ।
तद्दशांशं हुनेत् पुत्र तालकं चाज्यसंयुतम्[16] ॥१५॥
भगाकारे सुकुण्डेऽस्मिन्[17] मुद्रया हंस[18] बुद्धिमान् ।
वदरीफलमात्रं च आहुतीश्च कुमारक ॥१६॥
ब्राह्मणान् भोजयेत् पश्चात् सहस्रं शतमेव च ।
योगिनीं पूजयेत् पुत्र द्रव्यशुद्धिसमन्विताम् ॥१७॥
मन्त्रसिद्धिर्भवेत् सद्यो[19] देवता च प्रसीदति ।
शिवालये जपेन्मंत्रमयुतं च सुबुद्धिमान् ॥१८॥

---

१. घ. बगलामुखी । २. घ. समुच्चार्यं । ३. घ. तद्बीजं च पुनर्वदेत् । ४. 'ततश्च शक्तिवाराहं वाराहं च समुच्चरेत्' । ५. घ. त्रयश्चत्वारिंशद्वर्णं । ६. घ. बगलास्त्रं । ७. घ. दूर्वासो । ८. घ. ०रेवास्य । ९. घ. एव च । १०. घ. त्रास्त्रवगला ११. घ. ह्लौं । १२. मंत्रराजवदेवात्र । १३. घ. ध्यानं यत्नात् । १४. घ. शिवाम् । १५. घ. हेतुः संमिश्र० । १६. घ. चाल्पसंयुतम् । १७. घ. तु कुण्डे० । १८. ख. हंसीमुद्रेण । घ. हंसमुद्रेण । १९. घ. सत्यं ।

शत्रुक्षयं भवेत् सद्यो नान्यथा शिवभाषितम् ।
षट्सहस्रं जपेन्मन्त्रं निशायां चण्डिकालये ॥१९॥

जिह्वास्तम्भनमाप्नोति बृहस्पतिसमोऽपि वा ।
'जपित्वा च'[1] सहस्रं तु भैरवस्य च सन्निधौ ।२०॥

बुद्धिभ्रंशो भवेत् सद्यो वाणीपतिसमोऽपि वा ।
वीरभद्रालये पुत्र अयुतं जपमाचरेत् ॥२१॥

सिद्धिदो जायते वत्स नान्यथा शिवभाषणम् ।[2]
मातृकासन्निधौ मंत्री जपेद् दशसहस्रकम्[3] ॥२२॥

सद्यः स्तम्भनमाप्नोति वाल्मीकिसदृशोऽपि वा ।
ध्यानपूर्वं[4] जपेन्मन्त्री[5] अयुतं च कुमारक ॥२३॥

रूपयौवनवाञ्छत्रुर्व्याधिमान्[6] भवति ध्रुवम् ।
त्रिसहस्रं[7] जपेन्मन्त्रं[8] त्रिसहस्रं दिने दिने ॥२४॥

मण्डलाच्छत्रुसम्मोहं[9] कुबेरसदृशोऽपि च ।
ऐश्वर्यं नाशमाप्नोति कुबेरसदृशोऽपि वा ॥२५॥

त्रिकालमयुतं जप्त्वा ध्यानपूर्वं सुबुद्धिमान् ।
वगलाध्यानतो मन्त्रमयुतं जपमाचरेत् ॥२६॥

सर्वाङ्गं[10] वायुना शत्रुः शीघ्रं गच्छेद् यमालयम्[11] ।
पार्वतीसन्निधौ मंत्री जपेदयुतमादिशन्[12] ॥२७॥

रात्रौ पूजासमायुक्तो नग्नो दक्षिणदिङ्मुखः ।
अन्धो भवति तच्छत्रुरवश्यं[13] क्रौञ्चभेदन ॥२८॥

विघ्नराजं समभ्यर्च्य रवौ[14] तु जपमाचरेत् ।
त्रिसहस्रं जपेन्मन्त्रं कुक्षिरोगी भवेद्रिपुः ॥२९॥

मण्डलान्नाशमायाति नात्र कार्या विचारणा ।
प्रयोगान्ते च संस्कारं पूजाकाले समाचरेत् ॥३०॥

इति श्रीषड्विद्यागमे सांख्यायनतंत्रे द्वाविंशतिः पटलः ॥

---

१. ख. जपित्वाष्ट । घ. जपेत्पंच । २. घ. निर्वीर्यो जायते शत्रुर्नान्यथा शिवभाषितम् । ३. घ. अष्टसहस्रकम् । ४. घ. ध्यानात् पूर्वं । ५. घ. जपेन्मंत्रं । ६. घ. ०व्याधितो । ७. ख. त्रिसंध्यं । घ. त्रिसंध्यं च । ८. ख. जपते मंत्रं । ९. क. ग. घ. शत्रुसमूहं । १०. ख. घ. सर्वाङ्ग । ११. घ. यमालये । १२. घ. ०दयुतसंख्यया । १३. घ. तच्छत्रोर्मण्डला [त्] । १४. घ. रात्रौ ।

॥ अथ त्रयोविंशः पटलः ॥

स्वर्णसिंहासनासीनां सुन्दराङ्गीं शुचिस्मिताम् ।
बिम्बोष्ठीं चारुनयनां ध्यायेत् पीनपयोधराम् ॥१॥

स्कन्द[1] उवाच—

नमस्ताण्डवरुद्राय तापत्रयहराय च ।
वगलास्त्रमहामन्त्रैः प्रयोगान् वद शङ्कर ॥२॥

शिव[2] उवाच—

त्रिकालं तु समासीनो ध्यानपूर्वं तु[3] साधकः ।
त्रिसप्त मन्त्रयित्वा तु जपं पश्चात् समाचरेत् ॥३॥
नित्यं च त्रिसहस्रं तु षण्मासं विजितेन्द्रियः ।
वाचासिद्धिर्भवेत्तस्य शापानुग्रहकारका[4] ॥४॥
अश्वत्थमूले प्रजपेदयुतं ध्यानपूर्वकम् ।
भक्षणाद् व्याधिनाशं च भवेदेवं न संशयः ॥५॥
विभीतकतरोर्मूले अयुतं जपमाचरेत् ।
जिह्वास्तम्भनमाप्नोति साक्षाद्वागीश्वरोऽपिवा ॥६॥
कपित्थवृक्षमूले[5] तु प्रजपेदयुतं तथा ।
श्रोत्रस्तम्भनमाप्नोति सद्यो बधिरतां व्रजेत् ॥७॥
पिचुमंदतरोर्मूलेऽप्ययुतं जपमाचरेत् ।
प्राणस्तम्भनमाप्नोति[7] रोगी पीनसवान् भवेत् ॥८॥
कदलीमूलमाश्रित्य अयुतं जपमाचरेत् ।
पादस्तम्भो भवेत् सद्यो वातरोगी भवेद् रिपुः[8] ॥९॥
करञ्जमूलमाश्रित्याप्ययुतं जपमाचरेत् ।
स्तम्भयेज्जठराग्निस्तु अन्नद्वेषो भवेद् ध्रुवम् ॥१०॥
विषतिन्दुकमूलं च समाश्रित्य मनुं जपेत् ।
अयुताच्च[9] भवेत् पुत्र गात्रस्तम्भनमाप्नुयात् ॥११॥
नद्यां समुद्रगामिन्यां नाभिदघ्नजले[10] स्थितः[11] ।
तर्पयेद् वगलास्त्रेण ग्रस्तं कृत्वारिनाम[12] च ॥१२॥

---

१. घ. क्रौञ्चभेदन । २. घ. ईश्वर । ३. घ. सु । ४. घ. त्रिसहस्रे । ५. क. ख. ग. ०कारकम् । ६. घ. कपित्थतरु० । ७. घ. घ्राणस्तं० । ८. घ. नरः । ९. घ. नाभिमात्रे जले । १०. घ. नरः । ११. घ. तद्वैरिनाम ।

दिने दिने सहस्रैकं वगलाध्यानपूर्वकम् ।
गर्भस्रावं भवेत्तस्य भार्याया:[1] शिवभाषितम् ॥१३॥[2]

वल्लीपलाशमूले तु जपेदयुतसंख्यया ।
मन्त्रमध्ये रिपोर्भार्यां ग्रस्तं कृत्वा कुमारक ॥१४॥

तर्पणं च दिवा कृत्वा रात्रौ रात्रौ[3] जपेन्मनुम् ।
सापि वन्ध्या भवेत् सत्यं नात्र कार्या विचारणा ॥१५॥

श्मशाने प्रजपेन्मन्त्रं ग्रस्तं कृत्वा तु पूर्ववत् ।
सद्यस्तद्भार्यानाशं च भवेदेवं न संशयः ॥१६॥

शून्यागारे जपेदेवमयुतं[4] ध्यानपूर्वकम् ।
लक्ष्मीर्नाशयते नूनं[5] स शत्रुरवशिष्यते ॥१७॥

जंबीरतरुमूले तु अयुतं जपमाचरेत् ।
[6]भ्रमाकुलकुलं सर्वं मण्डलान्नाशमाप्नुयात् ॥१८॥

शतवारं मन्त्रितं च शर्करोदकमेव च[7] ।
रिपूणां चैव दातव्यं जिह्वास्तम्भनमाप्नुयात् ॥१९॥

शतं मन्त्रितं चैव नारिकेलफलोदकैः ।
पाययेद्रात्रि[8]रिपुभिर्जिह्वास्तंभनमाप्नुयात् ॥२०॥

नागवल्लीदलं चैव क्रमुकं चूर्णमेव च ।
सहस्रं मन्त्रितं पुत्र दातव्यं शत्रु(त्रू)णां निशि ॥२१॥

ताम्बूलचर्वणाच्छत्रुर्जिह्वास्तंभनमाप्नुयात् ।
चन्दनं चैव कस्तूरीघर्षितं मन्त्रयेत् सुत ॥२२॥

पुनश्च मन्त्रयेत्ताम्रपात्रे गुणसहस्रकम् ।
तच्चन्दनलेपनेन[9] रिपुर्भ्रान्तो[10] भविष्यति ॥२३॥

दन्तधावनकाष्ठं च मन्त्रयेत् त्रिसहस्रकम् ।
तत्काष्ठेन रिपोः[11] पुत्र दन्तधावनमात्रतः ॥२४॥

---

१. क. ग. घ. नार्यायाः । २. घ. पुस्तकेऽयं पाठो विशेषः—

तनो(तः) पलाशमूले तु प्रजपेच्च परे द्वयम् ।

३. घ. रात्रौ तु प्र । ४. घ. जपेन्मंत्र० । ५. घ. शीघ्रं । ६. ७. घ. पुस्तके नास्ति । ८. घ. प्राशयेद्वारि । ९. घ. ०विलेपेन । १०. घ. परिभ्रान्तो । ११. घ. रिपुः ।

जिह्वां वाणीं च बुद्धिं च 'मनः पादादिकं'[१] तथा ।
स्तम्भनं च भवेच्छीघ्रं शिवस्य वचनं यथा ॥२५॥

प्रेतवस्त्रं रवौ ग्राह्यं चितिकाष्ठं च वेष्टयेत् ।[२]
श्मशाने निखनेद् रात्रौ त्रिसहस्रं जपेत्तदा[३] ॥२६॥

शेषभाषापतिः साक्षाद् बृहस्पतिरपि स्वयम् ।
जिह्वास्तम्भनमाप्नोति सद्यो मूकत्वमाप्नुयात् ॥२७॥

इति षट्विद्यागमे सांख्यायनतन्त्रे त्रयोविंशतिः[४] पटलः ॥२३॥

॥ अथ चतुर्विंशः पटलः ॥

अम्बां पीताम्बराढ्यामरुणकुसुमगन्धानुलेपां त्रिनेत्रां,
गम्भीरां कम्बुकण्ठीं कठिनकुचयुगां चारुबिम्बाधरोष्ठीम् ।
शत्रोर्जिह्वासिपत्रं[५] शरधनुसहितां व्यक्तगर्वाधिरूढां[६],
देवीं संस्तम्भरूपां सुविरलरसनामम्बिकां[७] तां भजामि[८] ॥१॥

स्कन्द[९] उवाच—

नमस्ते वृषभारूढ नमः पन्नगकङ्कण[१०] ।
लक्षण वद मे देव वगलामन्त्रमालिका[११] ॥२॥

ईश्वर उवाच

भृगुवारे च संगृह्य[१२] 'आरामस्थनिशां तथा'[१३] ।
'तां शुष्कां'[१४] सप्तरात्रं तु 'कृत्वा मेतामनन्तरम्'[१५] ॥३॥

भूताविपरितं[१६] चैव कपिलागोमयं तथा ।
पुनरेकान्तराद्ग्राह्यं[१७] भाण्डमध्ये तु निःक्षिपेत् ॥४॥

सविषं जलसंयुक्तं कुर्यान्मेलनमेव च ।
हरिद्रां तत्र निःक्षिप्य पूजयेदाशु तत्क्रमात् ॥५॥

चुल्ल्योपरि च तद्भाण्डं रवौ रात्रौ च निःक्षिपेत् ।
द्विगुणं जलसंयुक्तं[१८] कुर्यान्मेलनमेव च ॥६॥

---

१. घ. क्षुत्पिपासामलं । २. घ. पुस्तकस्थोऽयं पाठो विशेषो दृश्यते—
प्राणप्रतिष्ठां कृत्वा तु पूजां चैव तु कारयेत् ।
३. घ. जपेन्मनुम् । ४. घ. बगलास्त्रविवरणं नाम त्रयोविंशतिः । ५. घ. ०सिपत्रां । ६. घ. शुक्लगरवादिरूढां । ७. घ. सुविरलवसना० । ८. घ. नमामि । ९. घ. क्रौञ्चभेदन । १०. ०भूषण । ११. ०जपमालिकाम् । १२. घ. संग्राह्य । १३. घ. आरामस्वासिशां निशि १४. ख. छायाशुष्का । घ. छायाभुक । १५. घ. कृत्वा तु तदनन्तरम् । १६. ख. भूमावपतितं । घ. भूमा(मौ) तु पतितं । १७. ख. पुनरेका कराद् ग्राह्यं । घ. पुनरेकांतशाद्ग्राह्यं । १८. घ. जपसंयुक्तं ।

अश्वत्थैरिन्धनैरेव ज्वालां 'कृत्वा सुबुद्धिमान्'[1] ।
तस्यां[2] मृदु भवेत्तावत्पचनं सम्यगाचरेत् ॥७॥

गोमयस्थां[3] हरिद्रां च क्षालयेद्वारिणा[4] ततः ।
छायाशुष्कं च कर्त्तव्यं हरिद्रामणिमादरात् ॥८॥

तेन कुर्यान्मालिकां च अष्टोत्तरशतं तथा ।
पुण्यस्त्रीनिर्मितं[5] सूत्रं[6] 'मंत्रैः संच्छेदयेत्[7]' पुनः ॥९॥

तन्मालिकां रवौ 'वारेऽप्यमृतेनैव'[8] मार्जयेत् ।
अर्चयेन्मूलमन्त्रेण षोडशैरुपचारकैः ॥१०॥

निवेदयेत् पायसं च शर्कराज्यसमन्वितम् ।
सहस्रं प्रजपेदादौ[10] पञ्चाशद्वर्णमादरात् ॥११॥

'एकाक्षरीमहामन्त्रैर्वगलानाम्नि'[11] पावनैः ।
अयुतं प्रजपेत् पुत्र मालिकासिद्धिमाप्नुयात् ॥१२॥

एवं च मालिकां कुर्यात् मंत्रसिद्धिमपेक्षता[12] ।
हरिद्रावस्त्रमाच्छाद्य सिद्धयर्थं जपमाचरेत् ॥१३॥

हरिद्रामयपुष्पं[13] च हरिद्रामयचन्दनम्[14] ।
समर्पयेदलङ्कृत्य[15] जपं रात्रौ समाचरेत् ॥१४॥

वी भूत्वा जपेद्देवीमर्चयेद्विधिवद्यथा[16] ।
प्रमादात् मालिका भूमौ पतिता चेत् कुमारक ॥१५॥

पुनः पूजा प्रकर्त्तव्या पूर्ववज्जपमाचरेत् ।
अथ वक्ष्ये प्रयोगांश्च मालिकालक्षणं तथा ॥१६॥

पञ्चविंशतिभिर्मोक्षः[17] 'सर्गं त्रिंशतिरेव च'[18]।
वशीकरणसंमोहे[19]'कला'संख्या सुमालिका'[20]॥१७॥[21]

---

१. घ. कुर्यात् प्रयत्नतः । २. घ. यावन् । ३. घ. गोमवयं । ४. घ. लक्षोयेद्वा० । ५. घ. पुनः । ६. ख. पण्यस्त्री० । घ. स्त्रीनिर्मिते । ७. घ. सूत्रे । ८. घ. एकैकं ग्रंथयेत् । ९. घ. रात्रौ मूलेनैव तु । १०. घ. च जपेच्चादौ । ११. घ. एकाक्षरं० महामंत्रैर्वगलायाश्च । १२. घ. ०मपेक्षिता । १३. घ. हरिद्रावर्णपुष्पं । १४. घ. हरिद्रावर्णचन्दनम् । १५. घ. समर्प्य पूजनं कृत्वा । १६. घ. ०राथा । १७. घ. मोक्षार्थी । १८. घ. धनार्थी त्रिंशदेव च । १९. घ. संमोहं । २० क. पुस्तकेऽयमंशो नास्ति । २१. अतः परं निम्नांशो विशेषः ग. घ. पुस्तकद्वये—
'विंशद्भिः स्तम्भनं विद्याद् विनाशे पञ्चमालिका' ।

जिह्वां वाणीं च बुद्धिं च 'मनः पादादिकं'[1] तथा ।
स्तम्भनं च भवेच्छीघ्रं शिवस्य वचनं यथा ॥२५॥

प्रेतवस्त्रं रवौ ग्राह्यं चितिकाष्ठं च वेष्टयेत् ।[2]
श्मशाने निखनेद् रात्रौ त्रिसहस्रं जपेत्तदा[3] ॥२६॥

शेषभाषापतिः साक्षाद् बृहस्पतिरपि स्वयम् ।
जिह्वास्तम्भनमाप्नोति सद्यो मूकत्वमाप्नुयात् ॥२७॥

इति षड्विद्यागमे साङ्ख्यायनतन्त्रे त्रयोविंशतिः[4] पटलः ॥२३॥

॥ अथ चतुर्विंशः पटलः ॥

अम्बां पीताम्बराढ्यामरुणकुसुमगन्धानुलेपां त्रिनेत्रां,
गम्भीरां कम्बुकण्ठीं कठिनकुचयुगां चारुबिम्बाधरोष्ठीम् ।
शत्रोर्जिह्वासिपत्रं[5] शरधनुसहितां व्यक्तगर्वाधिरूढां[6],
देवीं संस्तम्भरूपां सुविरलरसनामम्बिकां[7] तां भजामि[8] ॥१॥

स्कन्द[9] उवाच—

नमस्ते वृषभारूढ नमः पन्नगकङ्कण[10] ।
लक्षण वद मे देव बगलामन्त्रमालिका[11] ॥२॥

ईश्वर उवाच

भृगुवारे च संगृह्य[12] 'आरामस्थनिशां तथा'[13] ।
'तां शुष्कां'[14] सप्तरात्रं तु 'कृत्वा मेतामनन्तरम्'[15] ॥३॥

भूताविपरितं[16] चैव कपिलागोमयं तथा ।
पुनरेकान्तराद्ग्राह्यं[17] भाण्डमध्ये तु निःक्षिपेत् ॥४॥

सविषं जलसंयुक्तं कुर्यान्मेलनमेव च ।
हरिद्रां तत्र निःक्षिप्य पूजयेदाशु तत्क्रमात् ॥५॥

चुल्लचोपरि च तद्भाण्डं रवौ रात्रौ च निःक्षिपेत् ।
द्विगुणं जलसंयुक्तं[18] कुर्यान्मेलनमेव च ॥६॥

---

१. घ. क्षुत्पिपासामलं । २. घ. पुस्तकस्थोऽयं पाठो विशेशो दृश्यते—
प्राणप्रतिष्ठां कृत्वा तुं पूजां चैव तु कारयेत् ।
३. घ. जपेन्मनुम् । ४. घ. बगलास्त्रविवरणं नाम त्रयोविंशतिः । [illegible]
६. घ. शुक्लगरवादिरूढां । ७. घ. सुविरलवसना० । ८. घ [illegible]
क्रौञ्चभेदन । १०. ०भूषण । ११. ०जपमालिकाम् । १२. घ [illegible]
आरामस्वासिशां निशि १४. ख. छायाशुष्कां । घ. छायाभु[illegible]
तदनन्तरम् । १६. ख. भूमावपतितं । घ. भूमा(मौ) तु पतितं । [illegible]
ग्राह्यं । घ. पुनरेकांतशाद्ग्राह्यं । १८. घ. जपसंयुक्तं ।

द्विपञ्चसप्तविंशद्भिः[1] रुच्चाटे चार्कसंख्यया ।
ज्वरे[2] रोगादिपीडार्थं पंच चैव चतुर्द्दश ॥१८॥

पञ्चाशच्छान्तिकर्माख्ये[3] बुद्धि च चतुरुत्तरे ।
पञ्चदशाभिचारे[4] च मालिकाक्रममी(ई)दृशः[5] ॥१९॥

भृगुवारे च संगृह्य[6] द्रव्याण्येतानि पुत्रक ।
'हरिद्रापङ्कजं वस्तु कर्पूरं मृगनाभि च'[7] ॥२०॥

श्रीखण्डरोचनागरु-केसरं[8] च समं समम् ।
मर्द्दयेन्मु(दु)षसि प्रज्ञ[9] खल्वेनैव कुमारक ॥२१॥

तेन कुर्यात् पुत्तलीं च चतुरङ्गुलमानतः ।
सर्वाङ्गसुन्दरीं[10] देवीं द्विभुजां वगलामुखीम् ॥२२॥

चित्रपीताम्बरधरां[11] पीनोन्नतपयोधराम् ।
पीतवर्णां मदाघूर्णामर्द्धचन्द्रां च पुत्तलीम् ॥२३॥

प्राणप्रतिष्ठां कृत्वा तु संस्नाप्य[12] विधिनाऽर्भकम् ।
अखण्डतण्डुलेनैव हरिद्राक्षतमेव च ॥२४॥

कृत्वा एकाक्षरीमन्त्रैरक्षतान्[13] मूर्द्धनि निःक्षिपेत् ।
नित्यं चायुतपूजां च कुर्याच्चैव च पुत्रक ॥२५॥

देवीं सम्पूजयेत्सम्यक् जपं कुर्यात् सुबुद्धिमान् ।[14]
एवं कृत्वा तत्त्वलक्षं देवी प्रत्यक्षतामियात्[15] ॥२६॥

यत् परस्मै[16] न वक्तव्यं न वक्तव्यं कदाचन ।
एवं पूजाविधिं कृत्वा पुरा 'दुर्वाससेन च'[17] ॥२७॥

तत्त्वलक्षप्रमाणेन प्राप्तं 'ग्रन्थोदितं फलम्'[18] ।

इति षड्विद्यागमे सांख्यायनतंत्रे चतुर्विशतिः[19] पटलः ॥२४॥

---

१. क. पुस्तके 'द्विपञ्च' हीनः 'सप्तविंशद्भिः' शब्द एव दृश्यते । घ. विद्वेषे सप्तविंशद्भिः । २. घ. ज्वर । ३. घ. ०कर्मेषु । ४. घ. पञ्चदश्याभि० । ५. घ. ०मीदृशम् । ६. घ. संग्राह्य । ७. ख. घ. पुस्तके निम्नोऽयं पाठो विशेषः—

हरिद्रापङ्कजं वस्तु[1] चन्दनं कुसुमानि च ।
कस्तूरी चैव कर्पूर 'कर्पूरः मृगनाभि च'[2] ॥

८. घ. गोरोचनमुशीरं च केशरं । ९. ख. ०तुषसि प्रज्ञ । घ. मर्दयेन्मदिरायुक्तं । १०. घ. सुधा च सुन्दरीं । ११. घ. बगला वज्रधरा चैव । १२. घ. संस्थाप्य । १३. घ. एकाक्षरैर्मंत्रै० । १४. घ. पादद्वयं नास्ति । १५. घ. प्रत्यक्षमाप्नुयात् । १६. घ. यस्मै कस्मै । १७. घ. दूर्वासमौनिराट् । १८. घ. ग्रंथोक्तं फलमाप्नुयात् । १९. घ. मालाप्रकरणं नाम चतुर्विशति ।

---

1. घ. रक्तं । 2. घ. श्रीखण्डं चागरुं तथा ।

॥ अथ पञ्चविंशः पटलः ॥

नमामि वगलां देवीं शत्रुवाक्स्तम्भरूपिणीम् ।
भजेऽहं विधिपूर्वं च जयं देहि रिपून् दह ॥१॥

स्कन्द[1] उवाच—

नमः कैलाशनाथाय[2] नमस्ते मुनिसेवित[3] ।
चतुरक्षरीमहामन्त्रं वगलायाश्च मे वद ॥२॥

ईश्वर उवाच—

सप्तकोटिमहामन्त्रे[4] मन्त्रराजमिमं[5] शृणु ।
षट्प्रयोगैः स्तंभनं च सर्वकर्मोत्तमोत्तमम् ॥३॥

यदा शत्रुभयोत्पन्नं[6] तदानीमेव पुत्रक ।
अयुतं च जपेन्मन्त्रं वगलाचतुरक्षरम्[7] ॥४॥

मन्त्रोद्धारं प्रवक्ष्यामि न्यासध्यानादिकं तथा ।
प्रयोगं चोपसंहारं वक्ष्येऽहं तव पुत्रक ॥५॥

वेदादि विलिखेत् पूर्वं पाशबीजं ततः परम् ।
स्तब्धमायां ततोच्चार्य अंकुशं बीजमेव च ॥६॥

चतुरक्षरीं च वगलां सर्वमन्त्रोत्तमोत्तमाम् ।
न्यासविद्यां प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ॥७॥

पाशाङ्कुशान्तरितशक्तिरमां च तद्व-
तद्वन्न्यसेन्मदनबीजमथो वराहम् ।
वागीश्वरीं च वगलाख्यसुबीजराजं,
वन्यस्यतां करयुगे हृदयादिकेषु ॥८॥

चतुर्व्वर्णात्मिके[8] मन्त्रे[9] मातृकाबीजपूर्वकम् ।
प्रत्येकं च न्यसेत् पुत्र मन्त्रसिद्धिमवाप्नुयात् ॥९॥
अथवा वगलामन्त्रं सर्वैरङ्गुलिभिर्न्यसेत्[10] ।
ततो जपेन्मन्त्रराजं वगलाचतुरक्षरम्[11] ॥१०॥
ब्रह्मा ऋषिश्च छन्दोऽत्र गायत्री समुदाहृतम् ।
देवता वगलानाम्नी ध्यानं वक्ष्ये कुमारक ॥११॥

---

१. घ. क्रौञ्चभेदन । २. घ. कैलासवासाय । ३. घ. मौनिसेवित । ४. घ. चतुरक्षरीमहामंत्रं । ५. घ. ०मिदं । ६. घ. ०भयं प्राप्तं । ७. घ. वगलां चतुरक्षरीं । ८. ख. घ. चतुर्वर्णात्मकं । ९. ख. घ. मंत्रं । १०. घ. अङ्गुलीषु न्यसेत्तथा । ११. घ. ०चतुरक्षरीम् ।

कुटिलालकसंयुक्तां[1] मदाघूर्णितलोचनाम् ।
मदिरामोदवदनां प्रवालसदृशाधराम्[2] ॥१२॥

सुवर्णशैलसुप्रख्यकठिनस्तनमण्डलाम्[3] ।
दक्षिणावर्त्तसन्नाभिसूक्ष्ममध्यमसंयुताम् ॥१३॥

रम्भोरुपादपद्मां तां पीतवस्त्रसमावृताम् ।
एवं ध्यात्वा महादेवीं कुर्याज्जपमतन्द्रितः ॥१४॥

वेदलक्षं जपं कुर्यात् पर्वताग्रे कुमारक ।
'भिक्षाशिनः फलाशीनो'[4] मौनी भूत्वा समाहितः ॥१५॥

तर्प्पणं च दिवा कुर्याद् रात्री वा प्रजपेन्मनुम् ।
एवं कुर्यात् पुरश्चर्यां देवी प्रत्यक्षमाप्नुयात् ॥१६॥

रात्रौ होमं च कर्त्तव्यं दिवा ब्राह्मणभोजनम् ।
हरिद्रावस्त्रसंयुक्तं हरिद्रावर्णचन्दनम् ॥१७॥

'हरिद्रां चाक्षमालां च'[5] द्रावर्णदेवताम् ।
स्मरेच्च जपकाले तु सर्वसिद्धिकरं नृणाम् ॥१८॥

मधूकपुष्पसंमिश्रमर्चितेन जलेन वा ।
तर्पणं/तद्दशांशं च देवतामूर्द्ध्नि निःक्षिपेत् ॥१९॥

आज्येन मिश्रितं चैव शर्करापायसं हुनेत् ।
पूर्णाहुत्यन्तमनघ[6] ब्राह्मणान् भोजयेत् ततः॥ २०॥

योगिनीं पूजयेत् पश्चाद् द्रव्यशुद्धिसमन्वितः ।
मन्त्रसिद्धिर्भवेत्तस्य नात्र कार्या विचारणा ॥२१॥

आदौ भास्वररूपिणीं[7] कुरु तदा सद्वंशजां[8] योगिनीं,
नानालक्षणसंयुतां कुचभरां प्रौढां नवोढां तथा ।
स्ता(स्ना)ताभ्यंजनभूषणैश्च सहितां सच्चन्दनै[9] र्लेपितां,
पूजागारमुपानयेद्रहसि सा[10] द्रव्यैश्च शुद्धया रहः[11] ॥२॥

---

१. घ. कटिलोलकसंयुक्तां । २. घ. ०पराम् । ३. घ. सुवर्णकलश० । ४. घ. भिक्षाशी च फलाशी च । ५. घ. हरिद्राया क्षमा माला । ६. ख. मनघ । घ. मनना । ७. ख. मास्कर० । घ. भाषर० । ८. घ. सज्जातिजां । ९. स्वचन्दनै । १०. ख. तां । घ. सद् । ११. ख. घ. सह ।

लौकिके[1] चैव गुप्तात्र सौभाग्यार्चा कुमारक ।[2]
'मन्त्रसिद्धिकरं वक्ष्ये गोप्त्वं कुरु सर्वदा'[3] ॥२३॥
अङ्गत्रयेण संयुक्तं लौकिकार्चनमेव च ।
चतुरंगुलसंयुक्ता[4] गुप्तपूजा कुमारक ॥२४॥[5]
सौभाग्यार्चाविधिश्चैव[6] पञ्चाङ्गोपासनं भुवि ।
योषिद्भुक्तिद्रव्ययुक्तं[7] लौकिकार्चनमेव च ॥२५॥[8]
योषिच्छुद्धिद्रव्यपूजा पञ्चमीयुतमादरात् ।
एतत्सौभाग्यपूजा च मुनिगुह्यमुपासनम्[9] ॥२६॥
बिन्दुपात्रयुता पूजा निर्गुणा योगिनां मतम्[10] ।
एतच्चतुर्विधा चर्या[11] देशनामार्चनाविधिः[12] ॥२७॥
वक्ष्येऽहं[13] विधिवत्पुत्र न देयं यस्य कस्यचित् ।
सृष्टिः स्थितिश्च संहारं जीवन्मुक्तिपदं[14] तथा ॥२८॥
एतदर्चाविधिर्नामसंकेतं मुनिभिः[15] सह ।
सृष्टिश्च गौडदेशेषु[16] स्थितिः केरलदेशके ॥२९॥
संहारार्चा कामरूपे 'कुरुपाञ्चालयोः परम्'[17] ।
पीठोपरि समावेश्य गर्भकौलागमक्रमात्[18] ॥३०॥
अर्चनं[19] गौडदेशीयं[20] सृष्टिपूजाक्रमस्त्वयम् ।
पूर्वोक्तलक्षणोपेतां मृदुपर्य्यङ्कके[21] तथा ॥३१॥
शयनीकृत्य कन्यां[22] च स्थित्यर्चाक्रममादरात्[23] ।
केरले तु स्थितिश्चैव सिद्धयसिद्धिकरी[24] तथा ॥३२॥
कौलसारं च तन्नाम सर्वमन्त्रोत्तमोत्तमम् ।
पूर्वोक्तलक्षणोपेतास्तिष्ठन्ति कन्यका भुवि ॥३३॥

---

१. घ: लौकिकी । २. अतः परं निम्नांशोऽयं घ. पुस्तक एव दृश्यते—

एवं त्रिविधपूजां च मुनिगुह्यं सुपावनं ।
एकैकस्य च पूजाया लक्षणं कथ्यते सुत ॥

३. पादयुगं ग. पुस्तके नास्ति । ४. घ. चतुरङ्गसमायुक्तां । ५. श्लोकोऽयं ग. पुस्तके नास्ति । ६. ख. घ. विधि चैव । ७. घ. योषित्शुद्धि । ८. अतः परं निम्नांशो घ. पुस्तक एवाऽवलोक्यते—

योषिच्छुद्धिद्रव्यपूजा सुगुप्तार्चनमादरात् ।

९. घ. मुनिगुप्तं सुपावनम् । १०. घ. मता । ११. घ. चार्च्चा । १२. घ. ०नामार्चनं । १३. ग. हे । १४. घ. ०मुक्तं पदं । १५. घ. योगिभिः । १६. घ. देशे तु । १७. घ. कौलिकारवो (र्चा, चार) तत्पराम् । १८. घ. भर्गकौलागम० । १९. क. अोर्चनं । घ. अर्चना । २०. घ. गौडदेशीयं । २१. क. मृत्यु० । २२. ग. घ. शयनीकृतकन्या । २३. घ. स्थित्यर्चामर्च्यं० २४. ख. घ. सद्यः सिद्धिकरी ।

कामरूपाख्यदेशे तु संहाराह्वयपूजनम् ।
पूर्वोक्तलक्षणोपेतां कृत्वाभ्यञ्जनमादरात् ।।३४।।

बिन्दुमात्रं[1] गृहीत्वा तु कृत्वा मुक्त्यर्चनं[2] भुवि ।
कुरुपाञ्चालदेशीयमनिशं[3] पूजनं तथा ।।३५।।

कौलसारपरं[4] नाम चागमं भुवि[5] दुर्ल्लभम् ।
सम्यक् पूजाविधिश्चैव उपसंहृतमानसः[6] ।।३६।।

पञ्चमी चैव कर्त्तव्या सौख्यार्थं तस्य पुत्रक ।
'पात्रं चैव समासेन'[7] जपध्यानसमन्वितः ।।३७।।

देवो भूत्वा स्वयं पुत्र पञ्चमीं च समाचरेत् ।
संहारार्चनयोरेवमुपसंहृत्य[8] पूजनम् ।।३८।।

सम्पूजयेत्[9] पञ्चमीं चैव सौख्यार्थं तस्य साधकः ।
आदौ मध्ये तथा चान्ते बिन्दुपात्रार्थमेव[10] च ।।३९।।

अर्चयेत् पञ्चमीं कुर्याद् ग्रहणे चन्द्रसूर्य्ययोः ।
कुरुपाञ्चालदेशेऽथ[11] निर्गुणार्च्चाविधिस्तथा ।।४०।।

एतदर्च्चाविधिश्चैव दुर्ल्लभो[12] विधिशङ्करैः[13] ।
गौडदेशार्चनं पुंसां शान्तिपुष्टिकरं[14] सदा ।।४१।।

एवमेव विधिः पुत्र सर्वैश्वर्यप्रदायकः ।
कामरूपार्च्चनं पुंसां मारणविप्रयोगदा[15] ।।४२।।

कुरुपाञ्चालदेशार्च्चा सर्वसिद्धिप्रदा सदा ।[16]
एतदर्च्चाविधिं चैव यः करोति सुबुद्धिमान् ।।४३।।

जीवन्मुक्तः स एवात्र स सिद्धो नात्र संशयः ।
नारीनिन्दा न कर्त्तव्या स्वपादैस्तां न[17] संस्पृशेत्[18] ।।४४।।

नारीं दृष्ट्वा मानसेन वन्दनं च समाचरेत् ।
स्वप्रियामर्च्चयेत् पुत्र प्रियां पञ्चमिकां चरेत् ।।४५।।[19]

---

१. घ. बिन्दुपात्रं । २. गुप्तार्चनं । ३. घ. ०देशे तु अनिशं । ४. घ. ०सारतरं । ५. घ. शुचि । ६. ख. जपसंहृत० । घ. उपसपेद्वत्यसाधकः । ७. घ. न्यासं न्यस्स्वोभयोर्देशे । ८. घ. संहारार्चनयोगं च उप० । ९. पूजयेत् । १०. घ. बिन्दुप्रात्यर्थं० । ११. घ. तु । १२. घ. दुर्ल्लभम् । १३. घ. भुवि षण्मुख । १४. घ. पुष्टिकरि तथा । १५. ख. मारणादिप्रयोगदम् । घ. मारणादिप्रयागकृत् । १६. पदयुग्मं घ. पुस्तके नास्ति । १७. घ. स्वपादौ तां च । १८. घ. स्पृशेत् । १९. श्लोकोयं नास्ति घ. पुस्तके ।

स्वप्रियाबिन्दुपात्रं[1] च गृहीत्वा साधकोत्तमः[2] ।
असह्येनार्चनं कृत्वा बिन्दुपात्रं तथैव च ॥४६॥
उन्मादी च भवेत् पुत्र मृतः श्वानो भविष्यति ।

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे पञ्चविंशतिः[3] पटलः॥ २५॥

॥ अथ षड्विंशः पटलः ॥

जातवेदमये[4] देवि[5] जगज्जननकारिणि[6] ।
जय पीताम्बरधरे[7] 'बगलायै नमो नमः'[8] ॥१॥

स्कन्द[9] उवाच—

नमस्ते सिद्धसंसेव्य सिद्धविद्याधरार्चित ।
वगलाचतुरक्षर्याः प्रयोगं वद शङ्कर ॥२॥

शिव[10] उवाच—

'प्रयोगं तर्पणं चैव'[11] वक्ष्येऽहं तव पुत्रक ।
तर्पणं देवतावासं तर्पणं यंत्रसिद्धिदम्[12] ॥३॥
तर्पणं मन्त्रसंस्कारं सर्वं तत्तर्पणाद् भवेत्
तर्पणं द्रव्ययोगं च ततः[13] सिद्धिर्न संशयः ॥४॥
अर्चनं कलशे चैव काशमण्डलवर्जितम्[14] ।
गृहीत्वा क्षालयेत् सम्यक् पूजयेन्मूलमन्त्रतः[15] ॥५॥
तज्जलं च समानीय पूजयेत् सुसमाहितः ।
आपो वा इति मन्त्रेण मन्त्रयेत्तज्जलं पुनः ॥६॥
उपचारैः षोडशभिः पूजयेत् कुम्भमादरात् ।
तत्पवित्रेण संयुक्तं तर्पणस्यायुतेन च ॥७॥
तेनोक्तविधिना सम्यक् पूजनं तदुदाहृतम् ।
काकोलूकच्छदेनैव[16] पवित्रं ग्रन्थिमादरात् ॥८॥
तत्पवित्रेण संयुक्तं तर्पणस्यायुतेन[17] च ।
नेत्ररोगी भवेच्छत्रुर्दिवान्धो जायते ध्रुवम् ॥९॥

---

१. घ. स्वस्त्रिया० । २. ख. साधकोत्तमैः । ३. घ. पूजाप्रकरणं नाम० । ४. ५. ६. ७. घ. पुस्तके द्वितीयान्तः पाठः । ८. घ. बगलाम्बां नमाम्यहम् । ९. क्रौंचभेदनं १०. घ. ईश्वर । ११. घ. तर्पणाख्यं प्रयोगं च । १२. घ. मंत्रसिद्धिदं । १३. घ. तच्च । १४. घ. कालमण्डल० । १५. घ. मूलविद्यया । १६. घ. काकोलूकच्छदाभ्यां च । १७. घ. तर्पणेनायुतेन च ।

काकपत्रेण संयुक्तं[1] पवित्रग्रन्थिमादरात् ।
तेनैव सह सन्तर्प्य अय्युतं साधकोत्तमः ॥१०॥

काकवद् भ्रमते शत्रुर्महीमामरणान्तिकम्[2] ।
काकोलूकस्य पक्षाभ्यामेकीकृत्वा[3] सुबुद्धिमान् ॥११॥

कृत्वा पवित्रग्रन्थि च तेन सन्तर्प्य चादरात्[4] ।
अयुतं बगलामन्त्रैः शत्रुविद्वेषणं भवेत् ॥१२॥

विड्वराहमजारोमैः[5] पवित्रग्रन्थिमादरात् ।
तर्पयेदयुतं तेन[6] बगलाचतुरक्षरैः ॥१३॥

अन्नद्वेषो[7] जायते च स शत्रुरवशिष्यते ।
केशं च कलशस्थं च पवित्रग्रन्थिमादरात्[8] ॥१४॥

अयुतं तर्पणेनैव 'स शत्रोर्नाशनं'[9] भवेत् ।
उष्ट्ररोमेण कृत्वा तु पवित्रग्रन्थिरेव च ॥१५॥

तेनायुतं तर्पणेन मूको भवति पण्डितः ।
पूर्ववद्वाजिरोमेण तर्पणं च कुमारक ॥१६॥

हिक्वारोगो भवेत्तस्य[10] शीघ्रं[11] भ्रान्तो भविष्यति ।
खररक्तेन संमिश्रमर्चितं जलतर्पणात्[12] ॥१७॥

जिह्वास्तंभो भवत्येव वाणीपतिसमोऽपि वा ।
श्वानरक्तेन संमिश्रमर्चितं शुभवारिणा ॥१८॥[13]

अयुतं[14] तर्पणात्पुत्र[15] उन्मादी जायते रिपुः ।
काकरक्तेन सम्मिश्रमर्चितं शुद्धवारिणा ॥१९॥

अयुतं तर्पणात्पुत्र काकवद् भ्रमते महीम् ।
उलूकरक्तसंमिश्रमर्चितं शुभवारिणा ॥२०॥

रिपुरन्धो भवेत् पुत्र अयुताच्च न संशयः ।
मार्जारबालरक्तेन मिश्रिताज्जलतर्पणात्[16] ॥२१॥

---

१. घ. कृत्वा तु । २. घ. ०मातर्पणान्तिकम् । ३. घ. एकीकृत्य तु । ४. घ. बुद्धिमान् । ५. घ. गृध्रवाराहजैर्लोमैः । ६. घ. चैव । ७. ख. अन्यद्वेषो । घ. अन्तद्वेषो । ८. घ. ०माचरेत् । ९. घ. स्वशक्त्या० । १०. घ. भवेच्छीघ्रं । ११. घ. रिपुर् । १२. घ. शुद्धवारिणा । १३. घ. पुस्तकेऽयं श्लोको नास्ति । १४. घ. अयुतात् । १५. घ. तर्पयेत् पुत्र । १६. घ. मिश्रितं जलतर्पणम् ।

भ्रान्तचित्तो भवेच्छत्रुरयुताच्च न संशयः ।
विड्वराहस्य[1] रक्तेन मिश्रितं जलतर्पणम् ॥२२॥

उन्मादी च भवेच्छत्रुरयुतादेव[2] पुत्रक ।
लुलायरक्तसम्मिश्रजलेनैव तु तर्पणम् ॥२३॥

'अयुतादरिगर्वं तु'[3] मूकत्वं कुरुते नृणाम् ।
भुजङ्गरक्तसंमिश्रजलेनैव तु तर्पणम्[4] ॥२४॥

शत्रूणां मारणं पुत्र अयुताच्च न संशयः ।
छागरक्तेन संमिश्रमर्चितेन जलेन च ॥२५॥

तर्पणेनायुतेनैव व्रणरोगी भवेद्रिपुः ।
शशकस्य तु रक्तेन 'मिश्रितेन जलेन च'[5] ॥२६॥

क्षयरोगो 'भवेन्मर्त्योऽप्ययुताच्च'[6] न संशयः ।
मत्कुणस्य च 'रक्तेन मिश्रितेन जलेन च'[7] ॥२७॥

अयुतात्तस्य शत्रोश्च भवेन्मरणमुत्तमम् ।
मेषस्य पुच्छरक्तेन 'मिश्रितेन जलेन च'[8] ॥२८॥

अयुताज्ज्वररोगी[9] च जायते तत्क्षणाद्रिपुः ।
द्रव्येणैव च संमिश्रमर्चितं जलतर्पणम्[10] ॥२९॥

अयुताच्चिन्तितं कार्यं भवत्येव न संशयः ।
एतत्तर्पणयोगं च सिद्धात् सिद्धतरं सुत ॥३०॥
न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन ॥

इति षड्विद्यागमे सांख्यायनतंत्रे षड्विंशः[11] पटलः ॥२६॥

॥ अथ सप्तविंशः पटलः ॥

नानालङ्कारशोभाढ्यां नरनारायणप्रियाम् ।
वन्देऽहं बगलां देवीं परब्रह्माधिदेवताम् ॥१॥

स्कन्द[12] उवाच—

वन्दे पाशुपताध्यक्ष परमानन्दविग्रह ।
वद होमप्रयोगं च वगलाचतुरक्षरैः ॥२॥

---

१. घ. विड्वराहेण । २. घ. ०अयुताच्चैव । ३. घ. अयुदक्षिणा पञ्च । ४. घ. तर्पणात् । ५. घ. मिश्रितं जलतर्पणम् । ६. घ. भवेच्छत्रुरयुतात् । ७. घ. मिश्रितं जलतर्पणम् । ८. घ. मिश्रितं जलतर्पणम् । ९. घ. अयुताच्चर्मरोगी । १०. घ. पुस्तके पाठोऽयं विशेषः— नररक्तेन संमिश्रमर्चितं जलतर्पणम् ।
११. घ. चतुरक्षरीतर्पणं प्रयोगं नाम षड्विंशति । १२. घ. क्रौञ्चभेदन ।

शिव उवाच[१]—

वक्ष्ये होमविधिं सम्यक् सावधानेन श्रूयताम् ।
अयुतं पुत्र होमं[२] च पिचुमंदफलैर्हुनेत् ॥६॥

अयुताच्छत्रुसंहारो भ्रान्तभीतो[३] भवेद् ध्रुवम् ।
'करवीराणि रक्तानि'[४] अयुतं चाज्यसंयुतम् ॥४॥

हुनेत् त्रिकोणकुण्डे तु अयुताद्[५] रिपुमारणम् ।
विषतिन्दुकबीजं च सौवीरद्रवसंयुतम् ॥५॥[६]

ग्राममध्ये हुनेन् मन्त्री भगाकारे च कुण्डके ।
तद्ग्रामे वेदशास्त्राणि सर्वं विस्मृतिमाप्नुयात् ॥६॥

शेषभाषापतिप्रख्यः[७] 'स एव जडतामियात्'[८] ।
वटमूलं समाश्रित्य कृत्वा कुण्डं त्रिकोणकम् ॥७॥

तत्फलेन हुनेद् रात्रौ अयुतं चाज्यमिश्रितं ।
भाषापतिसमो विद्वांस्तत्क्षणाद् भ्रान्तिमाप्नुयात् ॥८॥

अश्वत्थमूलमाश्रित्य षट्कोणाकृतिकुण्डके ।
तत्फलं च हुनेद् रात्रौ[९] अयुतं चाज्यमिश्रितम् ॥९॥

स्फोटकव्रणसंयुक्तो 'म्रियते यमशासनात्'[१०] ।
उदुम्बरस्य[११] मूले तु षट्कोणाकृतिकुण्डके ॥१०॥

कोमलं तत्फलं सम्यगयुतं चाज्यमिश्रितम् ।
जुहुयाद्रजकस्याग्नौ जुहुयाद्दक्षिणामुखः[१२] ॥११॥

ग्रामं वा नगरं वाथ रम्यं राजकुलं 'तु वा'[१३] ।
नाडीव्रणसमायुक्तो नानादुःखेन पुत्रक ॥१२॥

म्रियते 'न च'[१४] सन्देहो नात्र कार्या विचारणा ।
राजवृक्षं समाश्रित्य तन्मूले च कुमारक ॥१३॥

---

१. घ. ईश्वर । २. घ. होमाच् । ३. घ. भ्रान्तचित्तो । ४. घ. हयारिरक्तकुसुमैः । ५. घ. तत्क्षणाद् । ६. ख. घ. पुस्तकद्वये विशेषोऽयं पाठः—

अयुतं जुहुयान्मंत्री तत्क्षणाद्रिपुमारणम् ।
पलाशबीजमयुतं तिलतैलेन संयुतम् ॥

७. घ. ०प्रख्या । ८. घ. सर्वं विस्मृतिमाप्नुयात् । ९. घ. पुत्र । १०. घ. मारकं भवति ध्रुवम् । ११. घ. औदुम्बरस्य । १२. घ. नग्नो दक्षिणदिङ्मुखः । १३. घ. तथा । १४. घ. नात्र ।

हस्तमात्रं भगाकारं कुण्डं कुर्याद् विचक्षण: ।
तत्फलं निम्बतैलेन मिश्रितं निशि बुद्धिमान् ॥१४॥

नेत्रायुतं हुनेद् धीमान् ग्रामं वा नगरं तथा ।
स्फोटकव्रणसंयुक्तो हस्तपादादिभग्नत: ॥१५॥

पर्यायान् म्रियते चैव[1] नात्र कार्या विचारणा ।
सर्षपं लवणं चैव तिलतैलेन मिश्रितम् ॥१६॥

अयुतं जुहुयान्मन्त्री ज्वररोगी भवेद्रिपु: ।
पिचुमंदस्य[2] तैलेन मिश्रितं लवणं तथा ॥१७॥

हुनेच्च[3] पूर्ववत् कुण्डे अयुतं प्रेतपावके ।
कुष्ठरोगी भवेच्छत्रुर्म्रियते तेन निश्चितम् ॥१८॥

शमीमूले हुनेत्पुत्र 'शृणु वक्ष्यामि तत्फलम्'[4] ।
तिलतैलेन सम्मिश्रं[5] तत्फलं निशि पुत्रक ॥१९॥

जुहुयात्तत्क्षणात् पुत्र 'शृणु वक्ष्यामि'[6] तत्फलम् ।
वातरोगी भवेच्छत्रुर्म्रियते नात्र संशय: ॥२०॥

अपामार्गस्य बीजं तु तिलतैलेन मिश्रितम् ।
शमीमूले हुनेत्पुत्र अयुतं ध्यानपूर्वकम् ॥२१॥

तत्रस्था: शत्रुभार्याश्च तद्गृहे तत्र योषित: ।
वन्ध्या: स्त्रियो भवेयुश्च सत्यमेव[7] शिवोदितम् ॥२२॥

शमीमूलं समाश्रित्य 'शलाटुं च समासत:'[8] ।
तिलतैलेन संमिश्रं जुहुयादयुतं तथा ॥२३॥

प्रेताग्नौ रजकाग्नौ वा पूर्वोक्ते चैव कुण्डके ।
वैरिस्त्रीणां भवेत् सद्य:[9] स्रवद्रक्तं[10] निरन्तरम्[11] ॥२४॥

तिलतैलेन संमिश्रं शलाटुं[12] शाल्मलीभवम्[13] ।
पूर्ववच्च हुनेत् पुत्र मेहरोगी[14] भवेद्रिपु: ॥२५॥

---

१. घ. शत्रु: । २. घ. पिचुमंदेन । ३. घ. हुनेत्तु । ४. ख. ग. घ. भगाकारे तु कुण्डके । ५. घ. संयुक्तं । ६. घ. वक्ष्यामि शृणु । ७. घ. सत्यमेतच्च । ८. घ. शार्दूलस्य च मांसत: । ९. घ. सद्यो । १०. घ. वा यद्रक्तं । ११. घ. सुनिश्चितम् । १२. घ. शैलूषं । १३. घ. ०भवेत् । १४. घ. महद्रोगी ।

एवं होमप्रयोगं च रात्रौ कुर्यात् कुमारक ।
'प्रयोगं चोपसंहारं सत्पुत्रायापि नो वदेत्'[१] ॥२६॥[२]

इति षड्विद्यागमे सांख्यायनतंत्रे सप्तविंशतिः[३] पटलः ॥२७॥

॥ अथाष्टाविंशतिः पटलः ॥

बालभानुप्रतीकाशां[४] नीलकोमलकुन्तलाम्[५] ।
वन्देऽहं वगलां देवीं स्तम्भनास्त्रस्वरूपिणीम् ॥१॥

स्कन्द उवाच—[६]

विश्वनाथ नमस्तेऽस्तु विरूपाक्ष नमो नमः ।
सुगमं[७] स्तम्भविद्यायाः प्रयोगं वद शङ्कर ॥२॥

शिव[८] उवाच—

वगलाहृदयं मंत्रं गुप्तगुप्ततरं[९] तथा ।
एतच्छ्रवणमात्रेण मंत्रसिद्धिमवाप्नुयात् ॥३॥

न ध्यानं न च होमं च न जपं न चतर्पणम् ।
सकृदुच्चारणान् मंत्राच्चिन्तितं[१०] भवति ध्रुवम् ॥४॥

न चाभिषेकं न च मंत्रदीक्षा,
न चात्र[११] दिक्काल ऋतुश्च[१२] देवता[१३] ।
न चापि पञ्चेन्द्रियनिग्रहं च,
सकृत् स्मरन्वै वगलाख्यहृन्मनुम्[१४] ॥५॥

वगलाहृदयं मंत्रं ब्रह्मादीनां च दुर्लभम् ।
संकृत् स्मरणमात्रेण वाञ्छितं फलमाप्नुयात् ॥६॥[१५]

---

१. घ. पुस्तकेऽयमंशो विशेषः—प्रयोमादौ प्रयोगान्ते पूजां कुर्यात् प्रयत्नतः ।
२. घ. पुस्तके श्लोकोऽयं विशेषो लभ्यते—

एवं यः कुरुते पुत्र प्रयोगं सिद्धिमाप्नुयात् ।
पूजां विना कृतं कर्म प्रयोगं निष्फलं भवेत् ॥२७॥

३. घ. चतुरक्षरीहोमकथनं नाम सप्तविंशतिः । ४. घ. बालभाव० । ५. घ. ०कुण्डलाम् । ६. घ. क्रौञ्चभेदन । ७. घ. सुभगं । ८. घ. ईश्वर । ९. घ. गुप्तात्० । १०. घ. तस्य चिन्तितं । ११. घ. न चापि । १२. ख. दिक्कालक्रमश्च । घ. दिक्पालक । १३. घ. देवताश्च । १४. घ. ०हृन्मनुः । १५. पद्यार्द्धमिदं ख. ग. पुस्तकद्वयेऽधिकं दृश्यते—

संचारवान् भवेत् पङ्गुर्वादी मूकत्वमाप्नुयात् ।

दरिद्रोऽपि भवेच्छ्रीमान् स्तब्धीभवति[1] पण्डितः ।
चतुरो मुष्करश्चैव[2] कीर्त्तिमान् निन्दको भवेत् ॥७॥
कवीश्वरोऽपि चोन्मादी[3] भोगासक्तोऽपि रोगवान् ।
रोगवान्[4] क्षयरोगी स्यात्[5] कुलजो[6] निन्दको भवेत् ॥८॥
मानी लघुतरश्चैव[7] नैष्ठिको भ्रष्टतां व्रजेत् ।
एतद्विना कलौ पुत्र सुकृतकीर्त्तिकारणम्[8] ॥९॥
गुणश्च वर्त्तते पुंसां तस्योत्पन्नकारणम्[9] ।
वगलाहृदयं मंत्रं सकृदावर्त्तयेत्तु यः ॥१०॥
तस्योल्लंघनमात्रेण नष्टः स्यात्पद्मजोऽपि वा ।
वगलाहृदयं मंत्रमुपासनपरस्य च ॥११॥
करोति यस्य[10] सन्तोषं तस्य सिद्धिर्भवेद् ध्रुवम् ।
येन केनाप्युपायेन हृन्मंत्रं येन[11] जायते ॥१२॥
सन्तोषं जनयेत् तस्य[12] चिन्तितं फलमाप्नुयात् ।
तन्मन्त्रोद्धारमतुलं 'तत्वतः स्वविधानतः'[13] ॥१३॥
वक्ष्येहं तव सर्वज्ञ[14] क्रौञ्चभेदन तच्छृणु ।
पाशबीजं ततोच्चार्य[15] स्तब्धमायां ततोच्चरेत्[16] ॥१४॥
अंकुशं बीजमुच्चार्य भूव(वा)राहं तथोच्चरेत् ।
वाराहं वाग्भवं चैव कामराजं ततः परम् ॥१५॥
श्रीबीजं भुवनेशीं च 'वगलामुखिपदं वदेत्'[17] ।
आवेशयद्वयं चोक्त्वा पाशबीजमतोच्चरेत् ॥१६॥
स्तब्धमायां ततोच्चार्य[18] मङ्कुशं बीजमुच्चरेत् ।
ब्रह्मास्त्ररूपिणीं चोक्त्वा एहियुग्मं ततोच्चरेत् ॥१७॥
पाशबीजमतोच्चार्य[19] स्तब्धमायां ततोच्चरेत् ।
अङ्कुशं बीजमुच्चार्य मम शब्दं ततोच्चरेत् ॥१८॥

---

१. क. स्तल्ली० । ख. घ. स्तब्धो भवति । २. घ. पुष्कर० । ३. घ. उन्मादी । ४. ग. रंगवान् । घ. सत्ववान् । ५. घ. च । ६. घ. कुलवान् । ७. घ. लज्जा-विहीनस्तु । ८. ख. घ. सुकृतं कीर्त्ति० । ९. ख. ग. तस्योपासन० । घ. तस्य नाशन० १०. घ. तस्य । ११. घ. यस्य । १२. घ. सद्यः । १३. घ. तदाराधनलक्षणम् । १४. घ. सर्वज्ञ । १५. घ. समुच्चार्यं । १६. घ. समुच्चरेत् । १७. घ. वगलामुखि उच्चरेत् । १८. घ. समुच्चार्यं । १९. घ. पाशबीजं समुच्चार्यं ।

हृदये 'तु समुच्चार्य'[1] आवाहययुगं वदेत् ।
सान्निध्यं कुरुयुग्मं च पुनर्बीजत्रयं वदेत् ॥१९॥
ममैव हृदयेत्युक्त्वा चिरं तिष्ठद्वयं वदेत् ।[2]
'पुनर्बीजत्रयं चोक्त्वा'[3] हुं फट् स्वाहासमन्वितः[4] ॥२०॥
अशीतिवर्णसंयुक्तो[5] 'वगलाहृदयं मनुः'[6] ।[7]
वन्ध्यामुन्मार्जयेदङ्गं[8] वगलाहृदयेन च ॥२१॥
वन्ध्या पुत्रवती चैव षण्मासाद् भवति ध्रुवम् ।
वगलाहृदयेनैव त्रिसप्तमभिमन्त्रितम् ॥२२॥
'पयः पिबति वा सा स्त्री'[9] वन्ध्या[10] पुत्रवती भवेत् ।
कृत्रिमेषु च रोगेषु नानाभयसमुद्भवे[11] ॥२३॥
त्रिसप्तमन्त्रितं तोयं सद्यो नैर्मल्यमातनोत् ।
नित्यमष्टोत्तरशतं[12] वगलाहृदयं मनुम् ॥२४॥
चिन्तितं च भवेत् पुत्र नात्र कार्या विचारणा ।

इति षड्विद्यागमे सांख्यायनतंत्रे अष्टाविंशतिः[13] पटलः ॥२८॥

॥ अथोनत्रिंशः पटलः ॥

नमस्ते देवदेवेशि नमः स्वर्णविभूषणे ।
पानपात्रयुते देवि वगले त्वां नतोऽस्म्यहम् ॥१॥

स्कन्द[14] उवाच—

अष्टमूर्त्ते नमस्तुभ्यं आनन्दगणसागर[15] ।
वगलाहृदयं यन्त्रं[16] प्रयोगं वद शङ्कर ॥२॥

ईश्वर उवाच—

बिन्दुत्रिकोणषट्कोणवृत्तत्रयविभूषितम् ।
षट्कोणं चैव वृत्तं च भूपुरद्वयसंयुतम् ॥३॥

---

१. पदमुच्चार्य । २. निम्नांशोऽयं घ. पुस्तक एव दृश्यते विशेषः—
पाशबीजं ततोच्चार्य स्तम्भमाया ततोच्चरेत् ।
३. घ. अस्त्रं सबीजमुच्चार्य । ४. घ. स्वाहेति उच्चरेत् । ५. घ. ०मंत्रोऽयं । ६. घ. मुनिगुह्यं सुपावनम् । ७. घ. पुस्तक एवायमंशो विशेषः—
पुत्रं देयं शिरो देयं न देयं हृदयं मनु ।
८. घ. वन्ध्यायां मार्जयेदेवं । ९. घ. पिबेदुदयकाले तु । १०. घ. सापि । ११. घ. ०समुच्चये । १२. घ. ०अष्टोत्तरं जप्त्वा । १३. घ. हृदयप्रयोगं नाम अष्टाविंशतिः । १४. घ. क्रौञ्चभेदन । १५. आनन्दगुणसागर । १६. घ. मन्त्रं ।

मध्ये लिखेन्महामन्त्रं वगलाहृदयं तथा ।
त्रिकोणेषु लिखेद् बीजं वगलाख्यं सुपावनम् ॥४॥

षट्कोणे वा लिखेन्मन्त्रं षट्त्रिंशद्वर्णकारकम् ।
शताक्षरीमहामन्त्रमाद्यवृत्ते लिखेत् क्रमात् ॥५॥

'तस्योपरि च संवेष्टच वगलाबीजमादरात्'[1] ।
तस्योपरि[2] विलिखेद्यन्त्रं 'स्वर्णे वा रौप्यपत्रके'[3] ॥६॥[4]

लिखित्वा शुभलग्ने तु स्पष्टरेखाश्च[5] संलिखेत् ।
स्पष्टबीजानि संलिख्य पूजयेदर्कवासरे ॥७॥
'सहस्रं प्रजपेन्मन्त्रं दुर्गाहृदयमादरात्'[6] ।
योगिनीः पूजयेत्तत्र धूपदीपार्चनादिभिः ॥८॥

कौलार्चनविधानेन मन्त्रसिद्धिर्भवेद्[7] ध्रुवम् ।
सुरक्तैः पूजयेद्यन्त्रं 'हयारिकुसुमैः शुभैः'[8] ॥९॥

इष्टसिद्धिर्भवेत्तस्य अयुतं जपमादरात् ।
मल्लिकाकुसुमेनैव[9] ह्यष्टोत्तरशतं जपेत् ॥१०॥

वगलाहृदयेनैव ह्यर्चयेज्ज्वरशान्तये ।
'मल्लिकाकुसुमेनैव ह्यष्टोत्तरशतं जपेद्'[10] ॥११॥

वगलाहृदयेनैव अष्टादशशतं तथा ।
अभ्रान्तं[11] वेदशास्त्राणां व्याख्याता भवति ध्रुवम् ॥१२॥

---

१. ख. घ. पुस्तकद्वये पादद्वयस्थाने निम्नांशो लभ्यते —

तदुपरि च संवेष्टच पञ्चाशद्वर्णमादरात् ।
तस्योपरि च संवेष्टच वगलाबीजमादरात् ॥
तस्योपरि च षट्कोणे वगला चतुरक्षरी :
कोणे कोणे लिखेन्मन्त्रं प्रत्येकं च कुमारक ॥

२. ख. घ. एवं च । ३. घ. स्वर्णरौप्यादिताम्रके । ४. अस्याग्रे निम्नांशो दृश्यतेऽधिकः ख. घ. पुस्तकयुग्मे—

'अष्टम्यां च'[1] चतुर्दश्यां नवम्यां भौमवासरे'[2]
उत्तराभिमुखो भूत्वा लेखिन्या स्वर्णजातया[3] ॥

५. घ. स्पष्टरेखासु । ६. घ.—

प्रजपेद् वगलायाश्च सहस्रं हृदयं मनुः ।

७. घ. सिद्धमन्त्रो भवेद् । ८. घ. हयारैश्च सुबुद्धिमान् । ९. ख. ०कुसुमैश्चैव । घ. ०कुसुमैर्दिव्यैः । १०. ख. घ.— श्यमन्तकुसुमेनैव ह्यर्चयेच्छतमादरात् । ११. घ.अश्रुतान् ।

---

1. घ. कृष्णाष्टम्यां । 2. घ. अथवा पौर्णिमादिने । 3. हेमतारयोः ।

हृदये 'तु समुच्चार्य'[1] आवाहययुग [illegible]
सान्निध्यं कुरुयुग्मं च पुनर्बीजत्रयं [illegible]
ममैव हृदये[illegible]
'पुनर्बीजत्रयं चोक्त्वा'[3] [illegible]
अशीतिवर्णसंयुक्तो[4] 'वगलाहृदयं मनु[illegible]
वन्ध्यामुन्मार्जयेदङ्गं[8] वगलाहृदयेन च ॥२१॥
वन्ध्या पुत्रवती चैव षण्मासाद् भवति ध्रुवम् ।
वगलाहृदयेनैव त्रिसप्तमभिमन्त्रितम् ॥२२॥
'पयः पिबति वा सा स्त्री'[9] वन्ध्या[10] पुत्रवती भवेत् ।
कृत्रिमेषु च रोगेषु नानाभयसमुद्भवे[11] ॥२३॥
त्रिसप्तमन्त्रितं तोयं सद्यो नैर्मल्यमातनोत् ।
नित्यमष्टोत्तरशतं[12] वगलाहृदयं मनुम् ॥२४॥
चिन्तितं च भवेत् पुत्र नात्र कार्या विचारणा ।

इति षड्विद्यागमे सांख्यायनतंत्रे अष्टाविंशतिः[13] पटलः ॥२८॥

॥ अथोनत्रिंशः पटलः ॥

नमस्ते देवदेवेशि नमः स्वर्णविभूषणे ।
पानपात्रयुते देवि वगले त्वां नतोऽस्म्यहम् ॥१॥

स्कन्द[14] उवाच—

अष्टमूर्ते नमस्तुभ्यं आनन्दगणसागर[15] ।
वगलाहृदयं यन्त्रं[16] प्रयोगं वद शङ्कर ॥२॥

ईश्वर उवाच—

बिन्दुत्रिकोणषट्कोणवृत्तत्रयविभूषितम् ।
षट्कोणं चैव वृत्तं च भूपुरद्वयसंयुतम् ॥३॥

---

१. पदमुच्चार्य । २. [illegible] च. पुस्तक एव दृश्यते विशेषः—
पाशबीजं ततोच्चार्य स्तम्भमाया [illegible] ।
३. घ. अङ्कुशबीजमुच्चार्य । [illegible]

वकुलैः पूजयेद्यंत्रं पुत्रवान् जायते नरः ।
'पलाशकुसुमैरर्चेद्यंत्रराजं'[1] कुमारक ॥१३॥

विद्यासिद्धिर्भवेत् पुत्र पूर्वसंख्याक्रमात्सुत[2] ।
पद्मपत्रेण सम्पूज्य पूर्ववद्यंत्रमादरात्[3] ॥१४॥

कुबेरसदृशो भूत्वा 'लभते भुवि संपदः'[4] ।
नन्द्यावर्त्तैर्यन्त्रराजं पूजयेत् पूर्ववत् सुत ॥१५॥

त्रैलोक्यं 'वशमाप्नोति पूजायाश्च प्रभावतः'[5] ।
चम्पकेनैव सम्पूज्य पूर्ववद्विजितेन्द्रियः ॥१६॥

तस्य दर्शनमात्रेण वादिनां स्तम्भनं भवेत् ।
विल्वपत्रेण सम्पूज्य पूर्वसंख्यासु बुद्धिमान् ॥१७॥

द्रव्यलाभं[6] भवेत्तस्य तत्क्षणादेव पुत्रक ।[7]
अशोकपुष्पैः सम्पूज्य पूर्ववद्विजितेन्द्रियः ॥१८॥

श्रेष्ठराज्यं भवेत्पुत्र अनायासेन साधकः ।
केतकीकुसुमेनैव पूर्ववत्पूजयेत्सुत ॥१९॥

निधानं[8] लभते तस्य शिवस्य वचनं यथा ।
पीतवर्णेन पुष्पेण 'निर्गन्धेन सुगन्धिना'[9] ॥२०॥

अर्चयेदयुतं मंत्री षोडशैरुपचारकैः ।
वाचां[10] सिद्धिर्भवेत्तस्य देवीरूपो न संशयः ॥२१॥

तस्य दर्शनमात्रेण सर्वसिद्धिमवाप्नुयात् ।
यजेत्तद्वगलायन्त्रं[11] मुनिगुह्यं सुपावनम् ॥२२॥

प्रकाशयेन्न[12] कस्यापि देवताशापमाप्नुयात् ।

इति षड्विद्यागमे सांख्यायनतंत्रे एकोनत्रिंशः[13] पटलः ॥२९॥

---

१. घ. पालाशपुष्पसंपूज्यः मंत्रराजं । २. पूर्वसंख्या पुत्रक । ३. घ. पूर्ववत् क्रौंचभेदन । ४. घ. मोदितो भुवि संपदैः । ५. घ. वशमायाति यावज्जीवं न संशयः । ६. घ. द्रव्यलाभो । ७. घ. पुस्तक एव निम्नः श्लोको दृश्यते विशेषः—

तुलसीमंजरीभिस्तु पूर्ववत्पूजयेन्नरः ।
राजलाभो भवेत् सद्य अयत्नादेव पुत्रक ॥

८. ख. विधानं । ९. घ. निर्गन्धैर्वा सुगन्धिभिः । १०. घ. वाञ्छा । ११. घ. यएतद्वगलामंत्रं । १२. घ. न देयं यस्य । १३. घ. बगलायंत्रप्रकाशनं नाम एकोनत्रिंशः ।

अथ त्रिंशः पटलः ॥

नमस्ते देवदेवेशि पुत्रपौत्रप्रवर्द्धिनी(नि) ।
स्तम्भनार्थं भजेऽहं त्वां पीतमाल्यानुलेपनाम्[1] ॥१॥

स्कन्द[2] उवाच—

नमस्ते सर्वसर्वेश पुराणपुरुषोत्तम ।
वगलाष्टाक्षरमंत्रं[3] वद मे करुणाकर ॥२॥

शिव[4] उवाच—

वेदादि 'विलिखेत् पूर्वं'[5] पाशबीजमनन्तरम् ।
स्तम्भमायां[6] ततोच्चार्य अङ्कुशं बीजमेव च[7] ॥३॥
'हुं फट् स्वाहा'[8]-समायुक्तं मन्त्रमष्टाक्षरं[9] तथा ।
ब्रह्मा ऋषिश्च छन्दोऽस्य[10] गायत्री समुदाहृता ॥४॥
'देवता वगलानाम्नी चिन्मयी विश्वरूपिणी'[11] ।
ॐ बीजं ह्लीं शक्तिश्च क्रों कीलकमुदाहृतम् ॥५॥
न्यासविद्यां च वगलामन्त्रराजवदाचरेत्[12] ।
ध्यानं चैव प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ॥६॥
युवतीं च मदोद्रिक्तां[13] पीताम्बरधरां शिवाम् ।
पीतभूषणभूषांगीं समपीनपयोधराम् ॥७॥
मदिरामोदवदनां प्रवालसदृशाधराम् ।
'पानपात्रं च शुद्धिं च'[14] बिभ्रतीं वगलां स्मरेत् ॥८॥
एवं ध्यात्वा जपेत् पुत्र[15] वगलाष्टाक्षरीमनुम् ।
ध्यानेनैव[16] जपं कुर्याद् ध्यायेदाद्यन्तयोस्तथा[17] ॥९॥
'अशोकमूले निवसन् मधुरारससंयुतम्'[18] ।
हरिद्रामालिकाभिश्च वर्णलक्षं जपेन्मनुम् ॥१०॥

---

१. ग, पीतमाल्यांबुलेपनाम् । २. घ. रा. क्रौञ्चभेदन । ३. ख. घ. रा. बगलाष्टाक्षरी-मंत्रं । ४. ख. घ. रा. ईश्वर । ५. ख. शक्तिरादौ तु । ६. ख. घ. रा. स्तब्धमायां । ७. रा. बीजमुच्चरेत् । ८. ख. बगला च । ९. घ. मंत्रमष्टाक्षरी । १०. रा. छन्दोऽत्र । ११. '-' अयमंशः ख. पुस्तके नास्ति । रा. ०बीजरूपिणी । १२. ख. घ. बगलां० । १३. ख. घ. ०मदोन्मत्तां । रा. यौवनां च मदोन्मत्तां । १४. घ. रा. वैरिजिह्वां पानपात्रं । १५. घ. रा. मंत्रं । १६. रा, ध्यायन्नेव । १७. ख. ०पराम् । १८. घ. रा. अशोकमूलमाश्रित्य हरिद्राम्बरसंयुताम् ।

अष्टायुतं तर्पणं च हेतुसम्मिश्रवारिणा ।
तद्दशांशं हुनेत् पुत्र अन्नेन[1] 'च समं मधु'[2] ॥११॥

योगिनीं पूजयेत् पश्चाद् गर्भकौलागमक्रमात् (मैः)।
ब्राह्मणान् भोजयेत् पश्चाच्छतं[3] 'वाष्टशतं तु वा'[4] ॥१२॥[5]

एतन्मन्त्रस्य माहात्म्यं शिवो जानाति नान्यथा ।
बिल्वमूले जपेन्मंत्रमयुतं ध्यानपूर्वकम् ॥ १३॥

लक्ष्मीवान् जायते पुत्र दरिद्रस्तु[6] न संशयः ।
अश्वत्थमूले प्रजपेदयुतं पूर्ववन्नरः[7] ॥१४॥

अश्रुतानां[8] च शास्त्राणां[9] व्याख्याता भवति ध्रुवम् ।
शमीमूले जपेन्मंत्रमयुतं पूर्ववन्नरः[10] ॥१५॥

भ्रष्टराज्यं लभेत्पुत्र[11] अनायासेन निश्चितम्[12] ।
बदरीमूलमाश्रित्य अयुतं पूर्ववज्जपेत्[13] ॥१६॥[14]

वशीकरणसम्मोही 'जाय(ये)ते नात्र संशयः'[15] ।
उदम्बरतरोर्मूले[16] पूर्ववज्जपमाचरेत् ॥१७॥[17]

कुबेरसदृशः श्रीमान् जायते नात्र संशयः ।
कदलीमूलमाश्रित्य पूर्ववज्जपमाचरेत्[18] ॥१८॥[19]

---

१. ख. आज्येन । रा. तत्फलं । २. रा. कुसुमं मधु । ३. घ. रा. पुत्र शतं । ४. रा. वा तु तदर्द्धकम् । ५. ख. घ. रा. पुस्तकेषु विशेषः पाठो दृश्यते—

घ. रा. ध्यानोक्तां बगलां देवीं चमंदृग्दर्शनीभवेत् ।
ख. ईमदर्शने भवे देवि नान्यथा शिवभाषितम् ।

६. ख. घ. दरिद्रोऽपि । ७. घ. ध्यानपूर्वकम् । ८. ख. घ. अश्रुतानि । रा. अश्रुतं । ९. ख. घ. शास्त्राणि । रा. वेदशास्त्राणां । १०. ख. प्रजपेन्नरः । ११. ख. भवेत् सद्यो । १२. ख. रा. पुत्रक । १३. रा. ०न्नरः । १४. श्लोकोऽयं नास्ति घ. पुस्तके । १५. रा. स्वभावेनैव जायते । १६. घ. औदुम्बर० । १७. घ. पुस्तके श्लोकोऽयं नास्ति १८. घ. रा. अयुतं पूर्ववत् जपेत् । १९. घ. पुस्तके पद्यमदो नास्ति ।

'प्रयोगादीनि सर्वाणि सर्वसिद्धिर्भवेत्सुत'[१] ॥१९॥

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे त्रिंशत्पटलः[२] ॥३०॥

॥ अथ एकत्रिंशः पटलः ॥

विराट्स्वरूपिणीं देवीं विविधानन्ददायिनीम् ।
भजेऽहं बगलां देवीं भक्तचिन्तामणिं शुभाम्[३] ॥१॥

क्रौञ्चभेदन उवाच—

चन्द्रोपेन्द्रमहेन्द्रादिसंनुतः[४] सर्वमङ्गला(ल) ।
बगलाष्टाक्षरीमन्त्रं(न्त्र) प्रयोगान्[५] वद शङ्कर ॥२॥

---

१. ख. पुस्तके एतदशंस्थानेऽयमंशः समुपलभ्यते—

'प्रयोगादीनि सर्वाणि पूर्ववत्कारयेत् सुधीः ।
एतत्क्रमेणैव पुत्र बगलाष्टाक्षरीविधिः ।
संक्षेपेन मया प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥

अस्याग्रे निम्नांशो घ.पुस्तक एव दृश्यते—

अयुताल्लभते भोगं वाञ्छितं शिवता इव ।
पूगीवनं समाश्रित्य अयुतं पूर्ववज्जपेत् ॥१९॥

निक्षेपं लभते पुत्र अयुतान्मासमात्रतः ।
जंबीरतरुमाश्रित्य अयुतं पूर्ववज्जपेत् ॥२०॥

राजा चैव यथो भूत्वा सर्वस्वं दीयते ध्रुवम् ।
उद्यानवनमाश्रित्य अयुतं पूर्ववज्जपेत् ।२१॥
यं यं वापि स्मरेत् पुत्र तं तं प्राप्नोति निश्चितम् ।
पुष्पवाट्यां जपेन्मंत्रमयुतं पूर्ववत् सुत ॥२२॥

राजलाभो भवेत्तस्य नात्र कार्या विचारणा ।
नदीतीरे जपेन्मंत्रमयुतं पूर्ववन्नरः ॥२३॥
पुत्रवान् जायते लोके धनधान्यादिसंयुतः ।
एतन्मंत्री जपेन्मंत्रं तत्तत्फलमवाप्नुयात् ॥२४॥

एतदष्टाक्षरीमंत्रं सर्वमंत्रोत्तमोत्तमम् ।
प्रयोगादीनि सर्वाणि सर्वसिद्धिर्भवेत्सुत ॥२५॥

२. अष्टाक्षरीप्रयोगं नाम त्रिंशत्पटलः ।

३. रा० नमस्ते लोकजननी(नि) व्यासवाल्मीकिवन्दिते ।
स्तम्ब(म्भ)नास्त्रस्वरूपिण्यै बगले तां नमाम्यहम् ॥

४. रा० इन्द्रोपेन्द्रमहेन्द्रादिसन्तुष्ट । ५. रा. प्रयोगं ।

ईश्वर उवाच—

सर्षपं लवणं चैव चिताभस्म समं समम् ।
अर्कक्षीरेण खल्वेन मर्द्दयेत्[1] सूक्ष्मतोऽनघ[2] ॥३॥

अङ्गुष्ठमात्रां[3] कृत्वा तु पुत्तलीं पूर्ववत् सुत ।
बदरीकण्टकं[4] चैव सर्वाङ्गे तस्य लेपयेत्[5] ॥४॥

आरनालस्य भाण्डे तु अधोमुखीं[6] विनिक्षिपेत् ।
'अङ्गारवासरे पूज्या'[7] पुनस्तत्रैव निक्षिपेत् ॥५॥

एवं मासत्रयं कृत्वा 'जिह्वास्तंभं भवेद् रिपोः[8] ।
रवौ रात्रौ च संगृह्य[9] चिताभस्म समादरात् ॥६॥
बगलाष्टाक्षरीमंत्रं 'अयुतं मंत्रयेत्'[10] सुत ।
खाने पाने च तद्भस्म दातव्यं वैरिणस्तथा[11] ॥७॥

जिह्वा मुखं[12] च कर्णाक्षिपादादिस्तंभनं[13] भवेत् ।
तेनैव म्रियते शत्रुर्मासान्मण्डलमात्रतः[14] ॥८॥

आरनालेन[15] तद्भस्म रहस्येन विनिक्षिपेत्[16] ।
तदन्नभक्षणेनैव बुद्धिभ्रंशोऽपि[17] जायते ॥९॥

तद्भस्म 'तिलतैलेन शिरोभ्यङ्गं समाचरेत् ।
तेनैव तत्क्षणात् पुत्र[18] चित्तचाञ्चल्यवान्[19] भवेत् ॥१०॥

तद्भस्म चूर्णमिश्रं[20] 'कृत्वा चूल च वर्णकम्'[21] ।
'तेन शत्रुस्तत्क्षणाच्च'[22] बुद्धिजाड्यो भवेद् ध्रुवम् ॥११॥

विप्रचाण्डालयोः शल्यं[23] (सत्यं) प्रेतवस्त्रेण वेष्टयेत् ।
बगलाष्टाक्षरीमंत्रं[24] मंत्रयित्वा सहस्रकम्[25] ॥१२॥

---

१. रा. मर्दयं । २. रा. सूक्ष्मतो मुखम् । ३. घ. मात्रं । ४. रा. ०कण्टकान् । ५. रा. निक्षिपेत् । ६. रा. अधोभागे । ७. '—' रा. अङ्गारवारे सम्पूज्य । ८. रा शत्रुस्तम्भो भवेद् ध्रुवम् । ९. रा. संग्राह्य । १०. रा. मन्त्रयेन्नयुतं । ११. वैरिणा तथा । १२. रा. मतिः । १३. रा. कर्णादि० । १४. रा. शत्रुमण्डलं नात्र संशयः । १५. रा. आरनाले च । १६. रा. च निक्षिपेत् । १७. रा. बुद्धिभ्रष्टोऽभि । १८. रा. शत्रु । १९. रा. चित्तं चाञ्चल्यवाग् । २०. रा. मिश्रं तु । २१. रा. कृत्वा ताम्बूल-चर्वणम् । २२. रा. कृत्वा तत्क्षणाच्छत्रु । २३. रा. शल्य । २४. रा. बगलाष्टाक्षरै-र्मन्त्रैः । २५. रा. मधस्त्रकम् ।

रवौ रात्रौ शत्रुगेहे[1] ईशान्ये नैव(चैव) निक्षिपेत् ।
मण्डलांतद्गु(तगृं)हस्थोऽपि[2] म्रियते नात्र संशयः ॥१३॥

कंटकं[3] पुरपक्षस्य[4] त्रिसहस्रं तु मन्त्रयेत् ।
निक्षिपेच्छत्रुसदने नित्यं क[ल]हमाप्नुयात् ॥१४॥

काकोलूकदलं चैव 'भौमे वा रविवासरे'[5] ।
संग्रहेत् प्रेतवस्त्रेण वेष्टयेद् रविवासरे ॥१५॥

निक्षिपेद् रविवारे तु रिपु(पो)र्गेहे तु[6] बुद्धिमान् ।
ग्र(गृ)हविद्वेषणं[7] सद्यो जायते नात्र संशयः ॥१६॥

सर्ष(र्पं) मण्डूकयोः शल्यं प्रेतरज्वा तु वेष्टयेत् ।
निक्षिपेच्छत्रुसदने स श[त्रु]रवशिष्यति ॥१७॥

मार्जारबालरोमाञ्च(णि)[8] रवौ रात्रौ च संग्रहेत् ।
प्रेतवस्त्रं रवौ ग्राह्यं शिवनिर्माल्यमेव च ॥१८॥

रवौ रात्रौ च संग्राह्य नरास्थि च समं समम् ।
चूर्ण(र्णी) कृतं[9] तु तत्सर्वं मन्त्रयेदयुतं तथा ॥१९॥

धूपयेच्छत्रुसदने तस्य संचारयो(ण)-स्थले ।
'तद्धूपवासने शत्रुमूंको'[10] भवति तत्क्षणात् ॥२०॥

तच्चूर्णं देवतागारे भृगुवारे च धूपयेत् ।
'पलायते च तन्मंत्री'[11] शिवस्य वचनं यथा ॥२१॥

गजाश्ववृषभोलूकमहिषोरगकुक्कुटम्[12] ।
तच्चूर्णं धूपयोगेन सर्वं तृणजलादिकम् ॥२२॥

म्रियते सप्तरात्रेण स्वेदजाण्डजपिज(ड)जाः[13] ।
एतच्चूर्णं वृक्षमूले धूपयेच्च[14] कुमारक ॥२३॥

फलितं पुष्पितं वाथ स्थूलवृक्षमथापि वा ।
'सप्ताहात् शुष्कतां'[15] याति सिद्धियोगः कुमारकः ॥२४॥

---

१. रा. गृहे । २. रा. मण्डलं तु प्रहस्तोपि । ३. रा. कंठकं । ४. रा. परपुष्टिश्च । ५. रा. भोमवारस्य वासरे । ६. रा. सु । ७. रा. ०गृहे० । ८. रा. मार्जारीरोमबालं च । ९. रा. चूर्णं कृत्वा । १०. रा. धूपवासने शत्रुश्च मूको । ११. रा. पलायंती वनं भूत्ति । १२. रा. ०कुकुंटाः । १३. रा. श्वेतजांश्चाण्डजापि च । १४. रा. ०तु । १५. रा. समाहाच्छुष्कातं ।

मृगाणां[1] चैव शत्रूणां खाने पाने प्रयत्नतः ।
बुद्धिनाशो भवेश्छत्रु(त्रो)स्त्रिदिनं भक्षणात्[2] सुत ॥२५॥

प्रज्ञां[3] बुद्धि श्रियं चैव ऐश्वर्यं हरते[4] नृणाम् ।
एतच्चूर्णप्रयोगं[5] च ऋषीणामपि दुर्लभम्[6] ॥२६॥

चिताभस्म रवौ रात्रौ संग्रहेच्च[7] तदर्भक ।
अयुतं मन्त्रयित्वा तु रिपुमूर्ध्नि विनिक्षिपेत् ॥२७॥

काकवद् भ्रमते शत्रुर्महि(ही)मामरणान्तिकम् ।
'शिलामामलकं प्रस्थं'[8] सहस्रं संग्रहेद् बुधः ॥२८॥

'अर्कवारे तु संध्यायां'[9] मंत्रेणैकेन मन्त्रये[त्][10] ।
मंत्रितं 'निक्षिपेद् दूरे(द्वारे)[11] दक्षिणाभिमुखेन च ॥२९॥

नित्यं चैव सहस्रं तु निक्षिपेद् दशवासरे[12] ।
उच्चाटनं भवेच्छत्रोर्नान्यथा शिवभाषणम् ॥३०॥

धत्तूरपत्रमादाय सहस्रं मन्त्रयेन्निशि ।
प्रेतवस्त्रेण संवेष्टय भौमे शत्रुनिकेतने ॥३१॥

निक्षिपेद् द्वारदेशे तु मूको भवति तद्रिपुः ।
तन्मार्गे संचरेद् यस्तु तत्सर्वेऽप्यरिमन्दिरे[13] ॥३२॥

'खरबालं च रोमं च'[14] प्रेतरज्जुस्तथैव च ।
मन्त्रयेदयुतं[15] मंत्रं[16] निक्षिपेच्छत्रुमन्दिरे ॥३३॥

पक्षाद् वा मासयोगेन 'स शत्रुर्बान्धवैः सदा'[17] ।
म्रियते नात्र[18] सन्देहो नात्र कार्या विचारणा ॥३४॥

एतच्च बगलामन्त्रप्रयोगं[19] भुवि दुर्लभम्[20] ।
गुरुपुत्राय दातव्यं[21] न दद्याद्[22] यस्य कस्यचित् ॥३५॥

इति श्री[23] सांख्यायनतन्त्रे 'अष्टाक्षरीप्रयोगं नाम'[24] एकत्रिंशत्पटलः ।

---

१. रा. पितृणां । २. रा. भक्षयेत् । ३. रा. प्रज्ञां । ४. रा. हनते । ५. रा. प्रयोगः । ६. दुर्लभः । ७. रा. संग्रहेत । ८. रा. शटालूमूलकेप्रस्थं । ९. रा. अवकाशपिसंध्यायां । १०. रा. त्वां वदेत् । ११. रा. विनिक्षिपे । १२. रा. ०वासरम् । १३. रा. ०प्यतिमन्दधी । १४. रा. खरबालकरोमाणि । १५. १६. रा. ०दयुतैर्मंत्रै । १७. रा. बुद्धिनाशनपूर्वकम् । १८. रा, न च । १९. रा. ०प्रयोगो । २०. रा. दुर्लभः । २१. रा. दातव्यो । २२. रा. देयो । २३. रा. श्रीषड्विद्यागमे । २४. रा. नास्ति ।

॥ अथ द्वात्रिंशत्पटलः ॥

मन्त्रादौ तव बीजपूर्वकमथ क्लीं ब्लूं म्लूं[१] सौं[२] ग्लौं जप[न्][३],
तावद्[द्]ध्यानपराय[णः][४] प्रतिदिनं पीत्ता(ता)क्षमालाधरः ।
साध्याकर्षणवश्यमाशु बगले साध्यस्य शीघ्रं भवेत्,
प्रेताढ्यासनपूर्विके[५] विवसने तत्प्रेमभूमौ निशि ॥१॥

क्रौञ्चभेदन उवाच—

नमः पापविदूराय नमस्ते चन्द्रशेखर ।
बगलां[६] चोपसंहारविद्यां वद सुपावनी[म्] ॥२॥

ईश्वर उवाच—

ब्रह्मास्त्रस्तम्भिनी काली विद्या चास्त्रसुपावनी[७] ।
तस्यास्तत्स्मरणादेव[८] बगला शान्तिमाप्नुयात् ॥३॥

तद्विद्यां च प्रवक्ष्यामि शान्तौ[९] तच्छृणु[१०] षण्मुख ।
उच्चरेच्छक्तिवाराहं वाराहं[११] तदनन्तरम् ॥४॥

वाग्बीजं च ततो(थो)च्चार्य भुवनेशीं[१२] ततः परम् ।
महामायां[१३] ततो(थो)च्चार्य श्रीबीजं तदनन्तरम् ॥५॥

कालीशब्दद्वयं[१४] चोक्ता(क्त्वा) महाकालीपदं[१५] वदेत् ।
एहि शब्दद्वयं चोक्त्वा कालरात्री(त्रि)पदं वदेत् ॥६॥

स्फुरद्वयं समुच्चार्य्यं प्रस्फुरद्वितयं[१६] लिखेत्[१७] ॥७॥

स्तंभनास्त्रपदं चोक्त्वा ·मनीपदमुच्चरेत् ।
हुँ फट् स्वाहा-समायुक्तं मन्त्रमेवं समुद्धरेत्[१८] ॥८॥

पंचाशदूर्ध्वं मंत्रस्य[१९] वर्णत्रयविभूषितम्[२०] ।
ब्रह्मास्त्रस्तंभिनीकालीमन्त्रमेतन्न संशयः ॥९॥

पलाशमूलमाश्रित्य लक्षमेकं जपे[त्]स्मयः[२१] ।
तर्पयेत्तद्दशांशेन[२२] कर्पूरमिश्रितं जलैः[२३] ॥१०॥

---

१. रा. नास्ति । २. रा. सौः । ३. रा. जपे । ४. रा. ०परायणं । ५. रा. प्रेताध्यासन० । ६. रा. बगला । ७. रा. चास्त्रे सु । ८. तस्य स्मरणमात्रेण । ९. क. सान्तं । १०. रा. च शृणु । ११. रा. हुङ्कारं । १२. रा. भुवनेशं । १३. रा. मम मायां । १४. रा. कालि० । १५. रा. महाकालि० । १६. रा. महामोहद्वयं । १७. रा. वदेत् । १८. रा. समुच्चरेत् । १९. रा. मन्त्रस्तु । २०. रा. नवकेन विभूषितः । २१. रा. जपेन्नरः । २२. ०तद्दशांशशं च । २३. रा. जलम् ।

पलाशपुष्पैर्जुहुयाच्चतुरस्त्रे च कुण्डले(के) ।
ब्राह्मणान् भोजयेत् पुत्र[1] सहस्रं शतमेव वा ॥११॥

मन्त्रसिद्धिमवाप्नोति देवता च प्रसीदति ।
ब्रह्मा ऋषिश्च छन्दोऽस्यं(स्य) गायत्री समुदाहृतम्[2] ॥१२॥

देवता कालिका नाम[3] स्तंभनास्त्रविभेदिनी[4] ।
ध्यानं यत्नात् प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ॥१३॥

कालीं करालवदनां कलाधरधरां[5] शिवाम् ।
स्तम्भनास्त्रैकसंहारीं ज्ञानमुद्रासमन्विताम्[6] ॥१४॥

वीणापुस्तकसंयुक्तां कालरात्रिं नमाम्यहम् ।
बगलास्त्रोपसंहारीदेवतां[7] विश्वतोमुखीम्[8] ॥१५॥

भजेऽहं कालिकां देवीं जगद्वशकरां[9] शिवाम् ।
एवं ध्यात्वा तु मन्त्रज्ञः प्रजपेच्छुद्धि(द्ध)[10] मानसः ॥१६॥

वक्ष्येऽहं चोपसंहारक्रमं लोकोपकारकम्[11] ।
जम्बीरफलमादाय मन्त्रयेच्छतमादरात् ॥१७॥

भक्षयेत् प्रातरुत्थाय निद्रान्ते च कुमारक ।
एवं चार्कदिनं कृत्वा जिह्वास्तम्भादिकृत्रिमम् ॥१७॥

सद्यो नैर्मा(र्म)ल्यमाप्नोति तमः सूर्योदये यथा ।
रवौ श्वेतवचा[12] ग्राह्यं मन्त्रयेच्छतमादरात् ॥१९॥

प्रातःकाले भक्षयित्वा त्रिसहस्रं मनुं जपेत् ।
वाचं[13] मुखं पदं चैव 'जिह्वां बुद्धीन्द्रियाणि च'[14] ।२०॥

स्तम्भितं मन्त्रयोगेन तत्सर्वं शान्तिमाप्नुयात् ।
ताम्रपात्रे समादाय नदीजलमकल्मषम्[15] ॥२१॥

शतवारं मन्त्रयित्वा प्राशयेच्छान्तिमाप्नुयात्[16] ।
गोमूत्रं चैव संगृह्य मन्त्रयेच्छतमादरात् ॥२२॥

---

१. रा. पश्चात् । २. रा. समुदाहृतः । ३. रा. नाम्नी । ४. रा. स्तम्भनास्त्रकर्मभेदिनी । ५. रा. कलाधारधरां ।
६. रा. स्तंमनास्त्रैकसंहारि वंदेहं भद्रकालिकाम् ॥१४॥
स्तंभनास्त्रोपसंहारि ज्ञानमुद्रासमन्वितम्(ताम्) ।
७. रा. बगलास्त्रोपसंहारि विश्वतो । ८. रा. देवतामुखी । ९. रा. जाड्यवश्यकरी । १०. रा. ०श्सिद्धि । ११. रा. कौलोपकारकम् । १२. रा. श्वेतबला । १३. रा. वाचा । १४. रा. जिह्वाबुद्ध्यादिकान्यपि । १५. रा. श्लोकार्द्धमिदं नास्ति । १६. रा. तु षण्मासं ।

एवं कृत्वा जपेन्मन्त्रं[1] उन्मादं[2] शान्तिमाप्नुयात् ।
मन्त्रयेदारनालं च प्रातः प्रातः पिबेन्नरः ॥२३॥

मण्डलज्वररोगं च नाशमाप्नोति निश्चितम् ।
'अष्टोत्तरं मन्त्रयित्वा घारोलंबं'[3] पिबेन्नरः ॥२४॥

गर्भस्तंभनदोषं च मण्डलाच्छान्तिमाप्नुयात्[4] ।
भस्म च मन्त्रयेत्[5] प्रातः त्रिसप्त त्रिशतेन[6] वा ॥२५॥

तक्रेण[7] सहितं पीत्वा त्रिसहस्रं दिने दिने ।
बगलामंत्रयोगेन एतत्प्राणसमुद्भवः[8] ॥२६॥

नाशयेदाशु तत्सर्वं तुलराशिमिवानलः ।
यक्षधूपं[9] समानीता[10] मंत्रयेच्छतमादरात् ॥२७॥

धूपयेत्तेन सर्वाङ्गं दशरात्रं कुमारक ।
यक्षधूपोद्भवं[11] चैव प्रयोगं चैव[12] कृत्रिमम् ॥२८॥

तत्क्षणान्नाशमाप्नोति नात्र कार्या विचारणा ।
रवौ ब्राह्मीं समादाय छायाशुष्कं समाचरेत्[13] ॥२९॥

मन्त्रयेत् त्रिसहस्रं तु भक्षयेत् प्रातरेव च ।
एतद्विद्यां जपेन्नित्यं त्रिसहस्रं कुमारक ॥३०॥

बगलास्त्रकृतं[14] यद्यत् प्रयोगं दुर्लभम् भुवि ।
तत्सर्वं नाशमाप्नोति मासं मण्डलमात्रतः ॥३१॥

ब्राह्मीरसं समादाय मन्त्रयेच्छतधा पुनः ।
शर्करासहितं पीत्वा सहस्रं जपमाचरेत् ॥३२॥

नानाकृत्रिमदोषं च बगलामन्त्रतः[15] कृतम् ।
अमङ्गल्यो [द्] भवं नाथ[16] भूतले यदि[17] दुर्लभम् ॥३३॥

---

१. रा. तु षण्मासं । २. रा. उन्मादः । ३. रा. अष्टोत्तरशतं मन्त्रं घारोष्णं च । ४. रा. मण्डलान्नाशमा० । ५. रा. मंत्रयन् । ६. रा. सप्तमेव । ७. रा. मन्त्रेण । ८. रा. यद्यद्रूणसमुद्भवम् । ९. रा. वृक्षधूपं । १०. रा. समानीय । ११. रा. वृक्षधूपोद्भवं । १२. रा. नाश । १३. रा. समाहरेत् । १४. रा. बगलाविकृतं । १५. रा. गर्भे वा यन्त्रितं । १६. रा. बाधं । १७. रा. यत्तु ।

मण्डलान्नाशमाप्नोति तमः सूर्योदये यथा ।
एतद्विद्या साम्प्रदायं[1] गुरूक्तान्[2] लब्धमन्त्रवान् ॥३४॥
लक्षमेकं जपेन्मन्त्री[3] प्रयोगं नाशमाप्नुयात् ।
अशक्तश्च स्वयं पुत्र 'कुर्वते ब्राह्मणामपि'[4] ॥३५॥
द्विगुणां जपमाप्नोति तमः सूर्योदये यथा ।
एतद्विद्या सम्प्रदायं वद्वये ब्राह्मणानपि ॥३६॥[5]
द्विगुणं जपमात्रेण सर्वशान्तिमवाप्नुयात् ।
एतद्विद्यां विना पुत्र कलौ च बगलामुखि(खीं) ॥३७॥
प्रयोगशान्तिनं[6] भवे[न्] मंत्रयन्त्रौषधादिभिः ।
सप्तकोटिमहामंत्रप्रयोगेषु च पुत्रक ॥३८॥
एतद्विद्यापुरश्चर्य्या नाशयेदाशु[7] निश्चयम्[8] ॥
नमः श्रीकालिकादेव्यै कालरात्र्यै नमो नमः ॥३९॥[9]
उपसंहाररूपिण्यै देव्यै नित्यं नमो नमः[10] ॥४०॥

इति श्रीषड्विद्यागमे सांख्यायनतंत्रे 'प्रयोगसंहारं नाम[11] द्वात्रिंशत्पटलः ॥

॥ अथ त्रयस्त्रिंशत्पटलः ॥

पीनोत्तुङ्गजटाकलापविलसद्बालेन्दुसच्छेखराम्,[12]
बिभ्राणां शितशान्तकुम्भमुकुटां[13](टं)नेत्रत्रयालङ्कृताम् ।
शब्दब्रह्ममयीं त्रिलोकजननीं शक्तिं परां शाम्भवीम्,
देवीश्रीबगलां सुरासुरवरैरभ्यर्चितां भावयेत्[14] ॥१॥

क्रौञ्चभेदन उवाच—

नमः शिवाय साम्बाय ब्रह्मणेऽनन्तमूर्त्तये ।
वद मे चोपसंहारं यंत्रं लोकोपकारकम् ॥२॥

---

१. रा. समादाय । २. रा. गुरुतो । ३. रा. ०मन्त्रं । ४. रा. प्रार्थयेद्ब्राह्मणानपि । ५. रा. पद्यमिदं नास्ति । ६. घ०शान्ति न । ७. घ. नाशयेत्क्षण । ८. घ. निश्चयः । ९. रा. पद्यार्द्धमिदं नास्ति । १०. रा. पद्यार्द्धमिदं नास्ति । ११. रा नास्त्ययमंशः । १२. रा. ०द्बालेन्दु० । १३. रा. सित० । १४. घ. श्रीबगलां ब्रह्मास्त्रवीसुरनरैरभ्यर्चितामाश्रये ।

ईश्वर उवाच—

कपिलानवनीतं च कदलीपत्रमध्यत:[१] ।
लिप्त्वा[२] मंत्रं[३] लिखेत्तत्र 'कृत्वा पूजां'[४] च साधकः ॥३॥
Aषट्कोणं चाष्टकोणं च वृत्तं भूपुरमेव च ।
षट्कोणकर्णिकायां व(च)षट् बीजानि मनोर्लि[खे]त् ॥४॥
शिष्टाक्षराणि कोणेषु ब्रह्मास्त्रस्तम्भिनीमनुः ।
अष्टपत्रे लिखेन्मंत्रं तार्क्ष्यमालामनुस्तथा ॥५॥A
कोऽयंस्तार्क्ष्यमनुश्चेति वक्ष्येऽहं मन्त्रनायकम् ।
B आद्यवर्णं समुच्चार्य्य तार्क्ष्यबीजं ततः परम् ॥६॥
ॐ नमो पदमुच्चार्य्य पश्चाद् भगवते पदम् ।
तार्क्ष्यबीजं पक्षिराजायोक्त्वा तार्क्ष्यं ततः परम् ॥७॥
सर्वशब्दं ततो (थो) च्चार्यं अभिचारपदं वदेत् ।
ध्वंसकाय पदं क्षीमों हुँ फट् स्वाहा-समन्वितम् ॥८॥ B
तार्क्ष्यस्य मालामन्त्रश्च द्वात्रिंशद्वर्णसंयुतम् ।
अष्टपत्रे वेदवेदवर्णान् पूर्वादितो लिखेत् ॥९॥[५]

---

१. रा. कदलीपर्णके तथा । २–३. घ. लिप्य यंत्रं । ४. रा. यन्त्रमध्ये ।

A-A चिह्नान्तर्गतांशस्थाने रा० पुस्तके निम्नांश एवोपलभ्यते—

षट्कोणमध्ये विलिखेद्ब्रह्मास्त्रस्तंभिनीमनुः ।
अष्टपत्रे लिखेन्मन्त्रं तार्क्ष्यमालामनुस्तथा ॥

B-B चिह्नान्तर्गतांशस्थाने रा० पुस्तके निम्नाङ्कितः पाठभेदो दृश्यते—

अन्त्यवर्णं समुच्चार्यं चतुर्थस्वरपूर्वकम् ॥४॥
बिन्दुना भूषितं पुन तार्क्ष्यं एकाक्षरी तथा ॥
ॐकारबीजमुच्चार्यं तार्क्ष्यबीजं ततः परम ॥
ॐ नमो पदमुच्चार्यं ततो भगवते पदम् ।
पक्षिराजा उच्चार्यं अभिचारपदं वदेत् ॥
ध्वंसकाय पदं चोक्त्वा हुं फट् स्वाहासमन्वितम् ॥६॥

मंत्रः—ॐ क्षीं नमो भगवते पक्षिराजाय अभिचारादिसकलकृत्रिमध्वंसकाय हुँ फट् स्वाहा ॥

५. श्लोकस्यास्य रा० पुस्तके निम्नोऽयं पाठभेदः—

मालामंत्रं तार्क्ष्यविद्या षड्विंशद्वर्णसंयुता ॥
अष्टपत्रे लिखेत्तत्र प्रादक्षिण्यक्रमेण तु ॥७॥

प्राणप्रतिष्ठां यंत्रस्य[1] आद्यवृत्ते लिखेत् सुत ।
तदुपरि लिखेद् वर्णान्[2] पञ्चाशल्लिपिसंयुतान्[3] ॥१०॥
पाशाङ्कुशं च विलिखेद् भूपुरेषु यथाक्रमम् ।
अष्टकोणे लिखेद् वर्णान्[4] वज्रान्ते वर्म फट् तथा ॥११॥
एवं लिखित्वा यंत्रं च पूजयेन्मानसेन तु ।
एवं कृत्वा तु तत्सर्वं नवनीतं कुमारक ॥१२॥[5]
भक्षयेद् बदरीमात्रं सायं प्रातस्तु बुद्धिमान् ।
देवतावेशमतुलं मन्त्रयन्त्रादिकृत्रिमैः[6] ॥१३॥
शल्यदारुमयं 'तत्र प्रयोगं बगलाश्च यत्'[7] ।
नाशयेन्मण्डलादेव शि [व] स्य वचनं यथा ॥१४॥
एतद्यन्त्रं हृदि ध्यायेद् दुःखकाले सुबुद्धिमान् ।
दशरात्राद् व्यपोहंतु(ति) दारुणैरपि[8] कृत्रिमैः[9] ॥१५॥
रौप्ये वा स्वर्णपट्टे वा लिखेद् यंत्रमिमं बुधः[10] ।
पूजयेद् रक्तपुष्पेण[11] षोडशैरुपचारकैः ॥१६॥
कण्ठे वा बाहुमूले वा शिखायां वा कुमारक ।
बंधयित्वा वाभिचारं नाशमाप्नोति निश्चतम्[12] ॥१७॥
नागवल्लीदलेनैव[13] एतद्यंत्रं कुमारक ।
चूर्णेन विलिखेत् सम्यक् पूर्वं ताम्बूलचर्वणम् ॥१८॥
एवं कुर्यात् प्रातरेव तद्वत् सायं समाचरेत् ।
मासत्रयं[14] चरेदेवं कृत्रिमं हरते नृणाम् ॥१९॥[15]
कुर्यात् कृत्रिमरोगेण पीडिताय कुमारक ।
तत्कार्यगौरवं चैव लाघवं चावलोकयेत् ॥२०॥[16]
पक्षं वाथ त्रिसप्ताहं[17] मासं वा मण्डलं तथा ।
यथा व्याधिनिर्मुक्तं[18] च तावत्कालं कुमारक ॥२१॥

---

१. रा. मन्त्रं तु । २. रा. ०वर्णं । ३. रा. ०द्वर्णसंयुतम् । ४. रा. वज्र । ५. श्लोकोयं रा. पुस्तके नास्ति । ६. रा. कत्रिमः । ७. '–' रा. यच्च बगलायोग-मात्रतः । ८. रा. दारुणानपि । ९. रा. कृत्रिमान् । १०. रा. बुधैः । ११. रा. रक्तपुष्पैस्तु । १२. रा. निश्चयात् । १३. रा. ०चैव । १४. रा. मासमात्रं । १५. रा. पुस्तकेऽतः परं विशेषोऽयं श्लोको दृश्यते—

स्तम्भनास्त्रोपसंहारं मन्त्रेण च कुमारक ।
मार्जनं बिल्वपत्रेण आरोहादवरोहकम् ॥१७॥

१६. रा.० लोकयन् । १७. रा. त्रिसप्ताथ । १८. रा. व्याधिविमुक्तं ।

अनेन(नया)विद्यया पुत्र मार्जनं मुनिसंमतम्[1] ।
अथवा मन्त्रितं तोयं[2] सद्यः कृत्त्रिमनाशनम् ॥२२॥

भूपुरं वृत्तयुग्मं च तन्मध्ये च कुमारक ।
पञ्चकोणं लिखेत् सम्यक् तन्मध्ये चन्द्रमण्डलम् ॥२३॥

इन्द्रमध्ये[3] लिखेद् विद्यां कृत्त्रिमघ्नीं[4] च कालिकाम् ।
मनुरेव लिखेत् सम्यक् स्यष्टवर्णेन[5] संयुतम् ॥२४॥

पञ्चकोणे[6] लिखेन्मन्त्रं[7] पञ्च ब्रह्माख्यमेव च ।
आद्यपत्रे लिखेन्मन्त्रं[8] प्राणस्थापनकं तथा ॥२५॥
द्वितीये विलिखेत् सम्यक् पञ्चाशद्वर्णमादरात् ।
पाशाङ्कुशंवि लिखेद् भूपुरेषु चयथाक्रमम् ॥२६॥
एतद्यन्त्रं लिखेद् भूर्ये कसूर्यां(स्तूर्या) क्रौञ्चभेदन ।
यन्त्रे[9] प्राणान्[10] प्रतिष्ठाप्य पञ्च ब्रह्ममनुं जपेत् ॥२७॥
त्रिसहस्रं सहस्रं वा त्रिशतं शतमेव च ।
ब्राह्मणान् भोजयेत् पश्चाद् वित्ताशाठ्यं न कारयेत् ॥२८॥

तद्यंत्रधारणादेव कृत्त्रिमादिरनेकशः[11] ।
तत्क्षणान्नाशमाप्नोति जीवेद्[12] वर्षशतं तथा ॥२९॥

एतद्यन्त्रं[13] हृदि ध्यात्वा मानसेनैव पूजयेत् ।
त्रिसप्तदिनमात्रेण नानाकृत्त्रिमनाशनम् ॥३०॥

ताम्रपात्रे जलं ग्राह्यं श्रीसूक्तेनैव मन्त्रयेत् ।
शतं वार्द्धशतं वाथ त्रिसप्तमथ पुत्रक ॥३१॥

तुलसीमञ्जरीभिश्च नार्जयेद् रोगपीडितः[14] ।
आरोहादवरोहेण ऋचान्ते मार्जनं तथा ॥३२॥

त्रिकालमेककालं वा मार्जयेद् ध्यानपूर्वकम् ।
त्रिमोथं[15] च यद्रोगं नाशमाप्नोति निश्चितम् ॥३३॥

श्रीसूक्तेनैव जिह्वायां मार्जयेत् तुलसीदलैः ।
त्रिसप्तं[16] प्रातरुत्थाय जिह्वास्तं[भ]नशान्तिकृत् ॥३४॥

---

१. रा. मुनिसंवृतम् । २. रा. तोयैः । ३. रा. चन्द्रमध्ये । ४. रा. कृत्त्रिमघ्ने । ५. रा. अष्टवर्गेण । ६. रा. पञ्चवर्गेण । ७-८. रा. ०न्मंत्रैः । ९. रा यंत्रेण । १०. प्राणं । ११. ०रनेकतः । १२. घ. जपेद् । १३. रा. एवं यंत्रं । १५ रा. रोग-पीडिते । १६. कृत्त्रिमोथं (यं) । १७. रा. त्रिसहस्रं ।

कपटादिविनाशार्थे[1] प्राप्ते प्राणस्य सङ्कटे ।
विंशन्मनुविनाशार्थे[2] षट्त्रिंशद्रोगनाशने[3] ॥६॥

सूचिप्रयोगविध्वंसे महाशस्त्रास्त्रपातने ।
गतिस्तम्भे[4] मतिस्तम्भे[5] सूर्य्याग्निस्तम्भनेषु[6] च ॥७॥

नानारोगविनाशार्थं नानाक्लेशनिवारणे ।
रणे राजकुले शान्तौ[7] प्रयोगनाशनेऽपि च ॥८॥

परप्रयोगविध्वंसे परकृत्यानिवारणे ।
कृत्यावेशस्तम्भनोऽयं[8] प्रयोग षण्मुखाचर[9] ॥९॥

अनेन योगवर्य्येण सर्वदोषनिवारणम् ।
शृणु षण्मुख तद्योगं सर्वयोगोत्तमोत्तमम् ॥१०॥

'पीतावरणभूषी च पीतवस्त्रद्वयान्वितः'[10] ।
पीतयज्ञोपवीतस्तु महापीताश(स)ने[11] स्थितः[12] ॥११॥

'ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् सुत'[13] ।
'हरिद्राक्षमणि पीत'[14] सर्वकार्यं जपादिकम् ॥१२॥

वडवानलनामानं बाणमादौ जपेच्छतम् ।
उल्कामुख्यभिधं[15] बाणं द्विशतं प्रजपेत् सुत ॥१३॥

ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् नरः[16] ।
जातवेदमुखीबाणं 'वेदसंख्याशतं' [illegible] ॥१४॥

बृहद्भानुमुखीबाणं जपेत् पञ्चशतं सुत ।
'य एकादि'[18] महाविद्यां कुल्लुकादिसमन्वितम्[19] ॥

नेत्रलक्षं जपेन्मन्त्रं क्रूरकर्मादिनाशने[20] ।
[illegible]यां[21] चरेद्धो(द्धो)मं काम्यं गौरवमिच्छति ॥१६॥

[illegible]नाशार्थे । २. ख. विशनष्टि विनाशार्थे । ३. ख. षट्त्रिंशद्वाण० ।
४. [illegible] ५. ख. रतिस्तम्भे । ६. ख. ०स्तम्भनेऽपि । ७. ख. शत्रौ ।
८. [illegible] ९. ख. षण्मुखाचरः । रा. षण्मुखाचरेत् ।
१०. '–' ख. पीताभरणभूषःढया पीतवस्त्रद्वयान्वितः ।
[illegible]सनि । १२. ख. सुत । १३. '–' [illegible] [illegible]

गोक्षीरं प्रातरुत्थाय श्रीसूक्तेनैव मंत्रयेत् ।
दशवारं ध्यानपूर्वं तत्क्षीरं प्राशयेन्नरः'[1] ॥३५॥

कौटिल्यस्थापनं चैव मार्जयेन्मूलविद्यया ।
पुत्तल्यादिप्रयोगं च नाशमाप्नोति निश्चितम् ॥३६॥

ताम्रपात्रे जलं शुद्धं मंत्रयेदर्कसंख्यया ।
तज्जलप्राशनादेव बुद्धिभ्रंशो[2] विनश्यति ॥३७॥

उष्णोदकं ताम्रपात्रे त्रिसप्तमभिमंत्रयेत् ।
नानाशूलं च हृद्रोगं नाशमाप्नोति पुत्रक ॥३८॥

इति श्रीषड्विद्यागमे[3] स्तंभनास्त्रोपसंहारं[4] नाम त्रयस्त्रिंशत्पटलः ।

॥ अथ चतुस्त्रिंशः पटलः ॥

विश्वेश्वरी विश्ववन्द्या विश्वानन्द स्वरूपिणी ।
पीतवस्त्रादिसन्तुष्टा[5] पीतद्रुमनिवासिनी ॥१॥[6]

क्रौञ्चभेदन उवाच

विश्वाराध्य भवानीश विश्वोत्पत्तिविधायक[7] ।
'ब्रूहि मे कृपया तात सकलागमकोविद'[8] ॥२॥

ईश्वर उवाच—

समस्तकर्म्मणां[9] ध्वंसे सर्वोपद्रवनाशने ।
जातिस्तम्भे मनःस्तम्भे क्रूरकर्मनिवारणे[10] ॥३॥

अष्टवेतालशमने सर्वभैरवनाशने[11] ।
मातृणां शान्तिजनकं स्तम्भनं जलरक्षसाम् ॥४॥

'देवदानवदैत्यारीन्(रि)शमने भ्रमनाशने'[12] ।
समस्तोपद्रवध्वंसे पूतनादिविनाशने[13] ॥५॥

---

१. रा. पूर्वंतत्क्षीरं प्राशयेन्नर तत्परः । २. रा. बुद्धिभ्रान्तो । ३. रा. पुस्तके 'सांख्यायनतन्त्रे' इत्यधिकः पाठः । ४. रा. उपसंहारप्रयोग । ५. रा. पीतवस्त्राद्य० । ६. ख. पुस्तके—

ईश्वरी विश्ववंद्या च विश्वानन्तररूपिणी ।
पीतवस्तुदय तुष्टा पीतं हृदयनिवाशिनीम् ॥

७. ख. ०गुणाकर । रा. ०कुमारक । ८. ख. रा. पद्यार्द्धमिदं नास्ति । ९. ख. समस्ते० । १०. ख. परकृत्यानिवारणे । ११. रा. सर्वभयविनाशिनीं । १२. ख. देवदानवदैत्या-दिशमनोऽत्र विनाशने । १३. ख. पुजनादिविचारणे ।

कपटादिविनाशार्थे[1] प्राप्ते प्राणस्य सङ्कटे ।
विंशन्मनुविनाशार्थे[2] षट्त्रिंशद्रोगनाशने[3] ॥६॥

सूचिप्रयोगविध्वंसे महाशस्त्रास्त्रपातने ।
गतिस्तम्भे[4] मतिस्तम्भे[5] सूर्य्याग्निस्तम्भनेषु[6] च ॥७॥

नानारोगविनाशार्थं नानाक्लेशनिवारणे ।
रणे राजकुले शान्तौ[7] प्रयोगनाशनेऽपि च ॥८॥

परप्रयोगविध्वंसे परकृत्यानिवारणे ।
कृत्यावेशस्तम्भनोऽयं[8] प्रयोग षण्मुखाचर[9] ॥९॥

अनेन योगवर्य्येण सर्वदोषनिवारणम् ।
शृणु षण्मुख तद्योगं सर्वयोगोत्तमोत्तमम् ॥१०॥

'पीतावरणभूषी च पीतवस्त्रद्वयान्वितः'[10] ।
पीतयज्ञोपवीतस्तु महापीताश(स)ने[11] स्थितः[12] ॥११॥

'ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् सुत'[13] ।
'हरिद्राक्षमणि पीत'[14] सर्वकार्यं जपादिकम् ॥१२॥

वडवानलनामानं बाणमादौ जपेच्छतम् ।
उल्कामुख्यभिधं[15] बाणं द्विशतं प्रजपेत् सुत ॥१३॥

ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् नरः[16] ।
जातवेदमुखीबाणं 'वेदसंख्याशतं'[17] सुत ॥१४॥

बृहद्भानुमुखीबाणं जपेत् पञ्चशतं सुत ।
'य एकादि'[18] महाविद्यां कुल्लुकादिसमन्विताम्[19] ॥१५॥

नेत्रलक्षं जपेन्मन्त्रं क्रूरकर्मादिनाशने[20] ।
हरिद्रायां[21] चरेद्धो(द्धो)मं काम्यं गौरवमिच्छति ॥१६॥

---

१. ख. क्रूरग्रहविनाशाये । २. ख. विशनष्टि विनाशार्थे । ३. ख. षट्त्रिंशद्बाण० ।
४. ख. मणिस्तम्भे । ५. ख. रतिस्तम्भे । ६. ख. ०स्तम्भनेऽपि । ७. ख. शत्रौ ।
८. ख. कृत्याविष० । ८. ख. षण्मुखाचरः । रा. षण्मुखाचरेत् ।
९. '–' ख. पीताभरणभूषःढया पीतवस्त्रद्वयान्वितः ।
११. ख. महापीतासुनि । १२. ख. सुत । १३. '–' अयमंशो घ. रा. पुस्तकयो र्नास्ति ।
१४. ख. हरिद्राक्षेण मणिना । १५. घ. उल्कामुखाभिधं । १६. ख. सुत । रा. ततः ।
१७. ख. तदन्ते संस्मरेत् । १८. ख. एकाक्षरी । १९. घ. कुमार्केदि० । २०. ख. क्रूरकर्मण० । रा. कुकर्मादि० । २१. ख. हरिद्रया ।

शतं त्रिशतकं पुत्र हुनेद्दशसहस्रकम्[1] ।
'हरिद्राघृतसंमिश्रैः क्रूरकर्मविनाशनम्'[2] ॥१७॥
'हरिद्राहोममात्रेण क्रूरकर्मण(वि)नाशनम्'[3] ।
'तर्प्पणात्तालनीरेण हेतुना'[4] मार्जयेत् सुत ॥१८॥
'सुवासिनी ब्राह्मणांश्च'[5] 'वगलार्चां कुमारक'[6] ।
सौभाग्यार्चाक्रमेणैव' 'ब्राह्मीमुद्रां च'[7] धारणात् ॥१९॥
'बन्धनं त्रिपुरश्चैव दीपिका तस्य'[8] योजनात् ।
'कृत्यावश्यस्तम्भनाख्यो(ख्यं) 'योगं सर्वं भयापहम्'[9] ॥२०॥
त्रैलोक्यविजयं नाम विजयं[10] मण्डलं तथा ।
पञ्चास्त्रमूलपठनाद् गारुडो जायते सुत ॥२१॥
पीताशी पीतवाणी च पीतशय्यासमन्वितः ।
पीताम्बरादिसंयुक्तः पीतपूजापरायणः ॥२२॥[11]
पञ्चक्रमसमायुक्तां[12](क्तः) सिद्धयोगी[13] नरः सुत ।
ग्रसिनी सर्वविद्यानां रक्षणी सकलापदाम् ॥२३॥
मर्दिनी[14] सर्वशत्रूणां नाशिनी सर्वरक्षसाम् ।
उपसंहारयोगेषु योगो यं भवति[15] ध्रुवम् ॥२४॥
'अन्ययोगसमारम्भं कृतं सिद्धयति वा न वा'[16] ।
'योगमेवं समासाद्य सिद्धभोगी'[17] नरः कलौ ॥२५॥
'अघोराश्च पाशुपती संहारो मोहिनोपि(ति) च'[18] ।
षट्त्रिंशदस्त्रसंस्तम्भः पञ्चास्त्रेण प्रजायते ॥२६॥
पञ्चास्त्रशस्त्रविज्ञानी पाञ्चभौतिकसिद्धियुक् ।
आद्यस्तु रणबाणास्त्रं[19] रणादिस्तम्भने जपेत् ॥२७॥

---

१. रा. ०सहस्रवान् । ख. सहस्रं त्रिसहस्रकम् । २. ख. हुनेद्दशसहस्रं वा हरिद्रा० घृतमिश्रितैः ॥ ३. '–' अयमंशो नास्ति घ. रा. पुस्तकयो । ४. '–' ख. तर्पनाल्लनिरर्णांय- घणहेतु । ५. ख. ब्राह्मणान् सुवासीनां । ६. '–' ख. भक्ता बालां वा च कुमारिकाम् । ७. ख. ब्राह्मीमुद्राभि । रा. ब्राह्मीमुद्रादि । ८. '–' ख. बन्धनानिष्ठुरश्चैव दीपकास्त्रस्य । ९. '–' ख. रा. कृत्याविषस्तम्भनाख्यो योगः सर्वविषापहः ॥
१०. ख. कवचं । ११. श्लोकोऽयं ख. पुस्तके नास्ति । १२. ख. ० समासक्तः । १३. ख. सिद्धिभागी । रा. ०भोगी । १४. ख. मथिनी । १५. ख. रा चलति । १६. '–' ख. अन्ययोगः शरभवत् कृते सिद्धमानवः ।
१७. ख. रा. '–' योगमेनं समासाद्य सिद्धिभागी । १८. ख. रा. अघोरास्त्रे पाशुपते- संहारे मोहनेऽपिच । १९. ख. वडवाबाणो ।

उल्कामुखीद्वितीयास्त्रं 'स्तम्भनं भुवनत्रये'[1] ।
ज्वालामुखीतृतीयास्त्रं स्तम्भनं ऋषिदैवतैः ॥२८॥

जातवेदमुखीबाणो ब्रह्मविष्ण्वादिरक्षणे[2] ।
'सर्वकर्मस्तम्भने च'[3] चतुर्थं प्रजपेत् सुत ॥२९॥

बृहद्भानुमुखीबाणं[4] पञ्चमं[5] परिकीर्त्तितम्[6] ।
षट्पञ्चकोटिचामुण्डा कालीकोटिशतं सुत ॥३०॥

सपादकोटित्रिपुरा पञ्चाशत्कोटिभैरवाः ।
नारसिंहा यातुधानाः पूतनाः कोटिचेटकाः[7] ॥३१॥

समस्तस्तम्भनं पुत्र पञ्चमेन प्रजायते ।
हस्ते सम्पाद्य[8] 'पञ्चास्त्रं शासनास्त्रं[9]' स्मरेन्मुखे ॥३२॥

स कल्पमुखभागी[10] स्यान्नात्र कार्या विचारणा ।
त्रैलोक्यविजयाख्यं च स्मरेदस्त्रेन्द्रमुत्तमम् ॥३३॥

यथोक्तकुण्डेषु हुनेद् वेदिकायां विशेषतः ।
चुल्ल्यां शकट्यां प्रेताग्नौ पञ्चस्थाने हुनेदपि ॥३४॥

चत्वरे सर्वकार्यार्थं होमयेदुक्तमार्गतः ।
'सकूर्चं स्त्रुक्स्त्रुवौ चैव तद्वश्चि(वि)श्च इति क्रमात्'[11] ॥३५॥

प्रणि(णी)ता प्रोक्षणीपात्रमाज्यस्थाली च षण्मुख[12] ।
सकलं[13] पूर्णपात्रं च 'ब्रह्मचर्येण योगतः'[14] ॥३६॥

क्रमात् सर्वं तु सम्पाद्य होमं कुर्यात् प्रयत्नतः[15] ।
'क्रूरकर्माणि नश्यन्ति'[16] तालकेन हुनेत् सुत ॥३७॥

पीतपुष्पैश्च जुहुयात् क्रूरकर्मविनाशने[17] ।
'क्रूरतर्पणयोगेन क्रूरविघ्ननिवारणम्'[18] ॥३८॥

---

१. '–' ख. त्रिलेकीस्तम्भने जपेत् । २. ब्रह्मविद्या० । ३. ख. सर्वकर्मणसंस्तम्भे । रा. सर्वकर्माणि स्तम्भे च । ४. ख. ०बाणः । ५. ख. पञ्चमः । ६. ख. परिकीर्त्तितः । ७. ख. कटपूतनाः । रा. ०पूतनाः । ८. ख. संधार्य । ९. '–' ख. चापास्त्रं ग्रसितास्त्रं । १०. ख. कल्पसुखभागी । रा. संकल्पमुखिभोगः । ११. '–' ख. –समित्कुशा स्त्रुकसुचौ च स्विष्मावर्हीति च क्रमात् । १२. ख. सन्मुखाः । १३. ख. कलशं । १४. ख. ब्रह्मचर्यो तु जापकः । रा. ब्रह्माचार्येण योगकः । १५. ख. प्रयोगवित् । १६. ख. रा. क्रूरकर्माणिनिर्नाशे । १७. ख. कूटकृत्रिमनाशने । १८. '–' ख. –पीतेन तर्पयेदेव क्रूरग्रहनिवारणम् । रा. क्रूरे तर्पणया देवी० ।

इति संक्षेपतः पूर्वं[1] किमन्यं[2] श्रोतुमिच्छसि ।

इति श्रीषड्विद्यागमे सांख्यायनतन्त्रे चतुस्त्रिंशत्पटलः[3] ॥३४॥

॥ अथ पञ्चत्रिंशः पटलः॥

योषिदाकर्षणासक्तां[4] फुल्लचम्पकसन्निभाम्[5] ।
दुष्टस्तम्भनमासक्तां[6] वगलां स्तम्भिनीं भजे ॥१॥

क्रौञ्चभेदन उवाच—

नमस्ते सर्वसर्वेश कर्पूरद्युतिसन्निभ[7] ।
योगिन्[8] सर्वादिसर्वज्ञ बीजभेदं वद प्रभो ॥२॥

ईश्वर उवाच—

अथातः सम्प्रवक्ष्यामि वगलामन्त्रनिर्णयम् ।
षट्त्रिंशदक्षरी विद्या 'त्रिपुरे चैव तिष्ठति'[9] ॥३॥

सांख्यायनमते देव्या[10] नारायण[11] ऋषिः स्मृतः[12] ।
'गायत्रीछन्द उद्दिष्टं देवता वगलाह्वया'[13] ॥४॥

सांख्यायनमते देवि वामाचारविधिर्मतः ।
ब्रह्मयामलसम्मत्या ब्रह्मा चास्य ऋषिः स्मृतः ॥५॥[14]

'गायत्री छन्द आदिष्टं देवता सैव कीर्त्तिता'[15] ।
'जयद्रथाख्ययामले तु'[16] ऋषिर्नारद एव हि ॥६॥

छन्दादिकं पूर्ववत् स्यादिति संक्षेपतो मतम् ।
हारिद्रसंहितायां तु ऋषिर्नारायणो मतः ॥७॥

अनुष्टुप्छन्द आख्यातं[17] देवता वगलामुखी ।
सांख्यायनमतं देवी(वि)कलौ जागर्त्ति[18] केवलम् ॥८॥

मृत्युञ्जयजपं कृत्वा ततो विद्यां जपेत् सुत[19] ।
मृत्युञ्जयं विना देवी 'वगला नहिं सिद्ध्यति'[20] ॥९॥

---

१. ख. प्रोक्त । २. ख. किमन्यच्च् । ३. ख. द्वात्रिंशति(एकत्रिंशत्)पटलः ॥३२ । ४. घ. ०सक्तयां । ५. ख. लसच्चम्पक० । ६. ख. ०स्तम्भनासक्तां । ७. रा. कर्पूर-धवल ०। ८. ख. योगी । ९. '–' ख. त्रिधा च परितिष्ठिता । रा. ०चैव निष्ठिः । १०. ख. देवी । ११. ख. नारदोऽस्य । १२. ख. मतः । १३. '–' ख.—अनुष्टुप्छन्द आख्यातं देवता वगलाह्वया । रा. ०देवता सैव कीर्तिता । १४. पद्यमिदं घ. पुस्तके नास्ति । १५. घ. पुस्तके नास्ति पद्यार्द्धमिदम् । १६. ख. जयद्रथाख्ययामले । रा. जयद्रथयामले तु । १७. ख. त्रिष्टुप् छन्दः समाख्यातं । १८. ख. जाग्रति । १९. ख. सुधीः । २०. '–' घ. पुस्तके नास्ति ।

'ऋषिच्छन्दत्रितयकं मतभेदात् प्रदर्शितम् ।
बीजसंज्ञां प्रवक्ष्यामि'[1] सांख्यायनमुखोद्भवाम्[2] ॥१०॥

शिवबीजं[3] वह्नियुक्तं रतिबिन्दुसमन्वितम् ।
'वह्निशिवान्तराले तु'[4] भूबीजं योजयेत्(पेत्), सुत[5] ॥११॥

स्थिरमाया इति[6] प्रोक्ता विद्या त्वेकाक्षरी शुभा ।
अनया विद्यया देवि किन्न सिद्ध्यति भूतले ॥१२॥

पीतवासामते पुत्र[7] स्थिरमायां शृणु प्रिये ।
'स्थिरमायासमायुक्तं स्थिरं बीजमितीरितम्'[8] ॥१३॥

तदुद्धारं शृणु प्राज्ञ[9] गगनार्द्धं[10] समुद्धरेत् ।
स्थिरबीजं समुद्धृत्य रतिबिन्दुसमन्वितम्[11] ॥१४॥

स्थिरमाया 'द्वितीयां तु इन्द्रस्तं चन्द्रभूषितम्'[12] ।
'इयं शप्ता'[13] महाविद्या कीलिता[14] स्तम्भिता शिवे[15] ॥१५॥

रेफयोगान्महेशानि[16] निश्शप्ता[17] फलदायिनी ।
रेफयुक्तां जपेद्विद्यां 'फलसिद्धिर्न संशयः'[18] ॥१६॥

रेफहीनां जपेद्विद्यां कोटिजाप्यं[19] न सिद्ध्यति ।
'तस्माद्रेफेण संयुक्तं'[20] स्थिरदा[21] परमेश्वरि ॥१७॥

संजपेच् 'च ततः पुत्र'[22] तस्य सिद्धिर्भविष्यति ।
लघुषोढां महाषोढां पञ्जरं न्यासमेव हि ॥१८॥

बगलामातृकान्यासं[23] 'कुल्लुकां च विचिन्त्य वै'[24] ।
सेत्वादिकामराजान्तं[25] न्यासमृत्युञ्जयं[26] जपेत् ॥१९॥

---

१. '–' चिन्हस्थोंऽशो घ. पुस्तके नास्ति । २. घ. रा. समुद्भवात् । ३. ख. जीव॰ बीजं । ४. ख. वह्निर्नशैवा॰ । रा. वह्निः शि॰ । ५. ख. शिवे । ६. ख. त्वियं । ७. ख. देवि । ८. ख.—स्थिररूपा तु या माया स्थिरमाया तु सा मता ।
रा. स्थिररूपा तु मामाया स्थिरमाया समायतु ।
९. ख. प्राज्ञे । १०. ख. रा. गगनार्णं । ११. ख. ॰विभूषितम् । १२. ख. त्वियं देवि बिन्द्वर्द्धं चन्द्रभूषिता । १३. घ. रा. इमं समा । १४. घ. रा. कलिता । १५. घ. रा. सुत । १६. घ. रा. महा सैव । १७. घ. रा. नित्यभाक् । १८. ख. रेफहीनां न संजपेत् । १९. ख. ॰जाप्ये । २०. ख. तस्माद्रेफं तु संयोज्य । रा. तस्माद्रेफस्तु संयुक्तं । २१. ख. स्थिराधः । २२. ख, प्रयतो देवि । रा. स जपे शतदः पुत्र । २३. ख. ॰मातृकां न्यस्य । २४. घ. रा. सकृदाचरितं तदा । २५. घ. सत्वादि॰ । २६. घ. रा. न्यस्य ।

ततो वै प्रजपेद्विद्यां सदा जाग्रत्स्वरूपिणीम् ।
पीतवासामते देवि[2] पञ्चप्रेतगतां[1] स्मरेत् ॥२०॥
चतुर्भुजां वा द्विभुजां पीतार्णवनिवासिनीम् ।
सुधार्णवसमासीनां मणिमण्डपमध्यगाम् ॥२१॥
सांख्यायनमते देवि[4] संस्मरेद् यत्नतः शिवे[5] ।
सुन्दर्याः पश्चिमाम्नाये बगला परितिष्ठति[6] ॥२२॥
श्रीकाल्यामु(उ)त्तराम्नाये वगला पूज्यतां सुत ।

इति षड्विद्यागमे सांख्यायनतन्त्रे पञ्चत्रिंशत्पटलः[7] ॥३५॥

॥ अथ षट्त्रिंशः पटलः ॥

योगिनीकोटिसहितां पीताहारोपचञ्चलाम्[8] ।
वगलां परमां वन्दे[9] परब्रह्मस्वरूपिणीम् ॥१॥

क्रौञ्चभेदन उवाच–

चिदानन्दघनावास[10] 'वरमन्यं च मां वद'[11] ।
सर्व्वातीत परेशान 'सर्वभूतहिते रत'[12] ॥२॥

ईश्वर उवाच–

अथ 'स्कन्द प्रवक्ष्यामि'[13] 'सर्वकर्माणि नाशनम्'[14] ।
किं केन 'तामसं प्राप्तं'[15] किं केन शान्तिकारणम्[16] ॥३॥
कारणं तत्र केन स्यात् तत्सर्वं कथ्यते शृणु ।
आदौ मन्त्रं जपेत् पुत्र त्रिसहस्रमतन्द्रितः ॥४॥
ततः कवचमालभ्य[17] पुनर्म्मन्त्रं जपेत् तथा[18] ।
षट्त्रिंशद्वारमावर्त्य[19] पुरश्चरणमुच्यते ॥५॥
सर्वकर्माणि निर्नाशे[20] योगोऽयं परिकीर्त्तितः ।
अनुलोमविलोमेन द्वितीयो योग ईरितः ॥६॥

---

१. घ. रा. पुत्र । २. घ. मतां । ३. घ. रा. श्चरेत् । ४. घ. रा. पुत्र । ५. घ. रा. सुत । ६. ख. परिनिष्ठिता । रा. परितिष्ठताम् । ७. ख. त्रिंत्रिंश (द्वात्रिंश) पटलः । ८. घ. पीताहारोपि० । रा. पीतहारो० । ९. घ. रा. देवीं । १०. ख. ०घनस्वामिन् । ११. ख. सारमन्यन्महेश्वर । रा. सारमन्यं च मां वद । १२. ख. सर्वभूतहिताध्वर । १३. ख. षण्मुख मध्वामि । १४. ख. सर्वकर्माणनाशनम् । १५. ख. रा. नाम सम्प्राप्तं । १६. ख. ०कारकम् । १७. घ. रा. ०मारभ्य । १८. घ. रा. ततः । १९. घ. रा. षड्विंशद्वर्णमावृत्या । २०. ख. सर्वकर्मणानिर्नाशे ।

प्रधानसम्पादकीय वक्तव्य

प्रस्तुत ग्रन्थ का सम्पादन श्रीलक्ष्मीनारायण गोस्वामी ने ५ हस्तलेखों के आधार पर किया है और पाठान्तरों को पाद-टिप्पणियों में दे दिया है। विद्वान् सम्पादक ने पुस्तक के पाठ को शुद्धतम रूप में प्रस्तुत करने के अतिरिक्त न केवल विद्वानों के लिए अपि तु साधकों के लिए भी उपयोगी एवं आवश्यक सामग्री को भूमिका तथा परिशिष्टों के रूप में दे दिया है। यह ग्रन्थ यद्यपि आकार में छोटा है, परन्तु 'बगला' की साधना के लिए यह अत्यन्त महत्वपूर्ण है। सम्पादक ने मन्त्रोद्धार को स्पष्ट करने का जो प्रयत्न किया है वह स्तुत्य है और इससे प्रकट है कि श्रीगोस्वामीजी को तन्त्र के व्यवहारपक्ष का कितना ज्ञान अपनी पैतृक सम्पत्ति के रूप में मिला है। इसीप्रकार पुस्तक की भूमिका के अन्तर्गत सम्पादक ने आगम-निगमादि के विषय में जो सामग्री प्रस्तुत की है वह भी बड़ी उपयोगी है और मैं इस सबके लिए विद्वान् सम्पादक को बधाई देता हूं। तन्त्रशास्त्र के अनेक ग्रन्थ प्रकाशित हुए हैं, परन्तु व्यवहार-पक्ष की उपेक्षा करने से वे प्रायः दुर्बोध बन गए हैं। मेरी इच्छा थी कि वह कमी इस ग्रन्थ में नहीं रहती। श्रीगोस्वामीजी तन्त्र-व्यवहार में भी पारङ्गत हैं, अतः इस कमी को दूर करना उनके लिए कठिन नहीं था और उन्होंने किसी सीमा तक इसको दूर किया भी है। परन्तु फिर भी ग्रन्थ के आकार के बढ़ने के भय से बहुत सी सामग्री नहीं दी गई। आशा है वह सब दूसरे रूप में तन्त्र-शास्त्र के व्यवहारपक्ष को उपस्थित करते हुए अन्यत्र दी जा सकेगी।

ग्रन्थ का मुद्रण प्रारम्भ हो गया था, परन्तु सम्पादक महोदय की अनेक व्यक्तिगत कठिनाइयों अथवा प्रतिष्ठान या प्रेस में उपस्थित अनेक विघ्न-बाधाओं के कारण, ग्रन्थ के प्रकाशन में आशातीत विलम्ब हुआ जिसके लिए मैं प्रतिष्ठान की ओर से क्षमाप्रार्थी हूँ।

अन्त में, मैं प्रकाशन विभाग के अध्यक्ष म० विनयसागर तथा साधना-प्रेस के व्यवस्थापक श्रीहरिप्रसाद पारीक को धन्यवाद अर्पित करता हूँ जिन्होंने रुचि एवं लगन के साथ इस ग्रन्थ को प्रकाशित करने में सहयोग दिया है।

—फतहसिंह

१ जनवरी, १९७०
जोधपुर

भूमिका

भारतवर्ष एक धर्मप्रधान देश है। यहाँ अनादिकाल से निगम एवं आगम-सम्मत धर्म की ही स्थिति प्रधान रूप में प्रचलित रही है। मन्त्रब्राह्मणात्मक वेदों को निगम अथवा छन्द नाम से वामन, भट्टोजी दीक्षित आदि महापण्डितों ने अभिहित किया है—'नितरामत्यन्तं निश्चयेन वा गच्छन्ति अवगच्छन्ति (जानन्ति) धर्ममनेनेति निगमश्छन्दः' अर्थात् ि रन्तर अथवा निश्चयपूर्वक जिसके द्वारा धर्म को जानते हैं उसे निगम अर्थात् छन्द कहते हैं। परा और अपरा-नामक विद्याओं[1] की स्थिति भी इसी में निहित है अतः इसी निगम को धर्मशास्त्र के आचार्य मनु ने विद्या एवं धर्म का स्थान माना है 'वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्य्ययः' अर्थात् वेदविहित कार्य ही धर्म एवं तदितर कार्य अधर्म है। याज्ञवल्क्य ने भी पुराण, न्याय, मीमांसा एवं धर्मशास्त्रस्वरूप अङ्गों से युक्त वेद को धर्म एवं चौदह विद्याओं का स्थान बतलाया है—

'पुर ण्न्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।'

त्रिकालदर्शी महर्षियों ने सम्पूर्ण शब्दराशि को आगम-निगम-भेद से दो भागों में विभक्त किया है। क्यों कि प्रकृतिसिद्ध नित्यशब्दब्रह्म इन्हीं दो भागों में विभक्त है। यद्यपि 'अथो वागेवेदं सर्वम्'[2] 'वाचीमा विश्वा भुवनान्यर्पिता'[3] आदि श्रौतसिद्धान्तों के अनुसार वाक्तत्व से प्रादुर्भूत होने वाले शब्दप्रपञ्च से कोई स्थान खाली नहीं है तथापि स्वर्गनाम से प्रसिद्ध १४ प्रकार के भूतसर्ग के साथ प्रधानरूप से अग्निवाक् और इन्द्रवाक् का ही सम्बन्ध है। पृथिवी अग्निमयी है और द्युलोकोपलक्षित सूर्य इन्द्रमय है[4]। पार्थिव एवं सौर अग्नि अन्नाद (अन्न खानेवाले) हैं और मध्यपतित चान्द्र सोम इन अग्नियों का अन्न बन रहा है[5]। अन्न जब अन्नाद के उदर में चला जाता है तो केवल अन्नाद-सत्ता ही

---

१. 'द्वे विद्ये वेदितव्ये परा चैवापरा च'। (१) परा—उपनिषद्विद्या। (२) अपरा—ऋग्वेदादिः।

२. ऐतरेयारण्यक० ३।१।६।

३. तैत्तिरीय ब्राह्मण २।८।८।४।

४. 'यथाग्निगर्भा पृथिवी तथा द्यौरिन्द्रेण गर्भिणी' शतपथब्राह्मण १४।६।७।२०

५. 'एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः' ,, १।६।४।५

ईश्वर उवाच—

तत्त्वं वद महादेव यदि पुत्रोऽस्मि ते वद।
रहस्यातिरहस्यं च कथ्यते शृणु पुत्रक ॥३॥

अमात्यानां च दुष्टानां दूषकानां दुरात्मनाम्।
क्षुद्रग्रहादिजातीनां सैन्यानामपि पुत्रक ॥४॥

क्रूरग्रहविनाशाय सर्वशान्त्यर्थमेव च।
पराभिचारशान्त्यर्थं रक्षार्थे च विशेषतः ॥५॥

अपमृत्युविनाशार्थं रोगशान्त्यर्थमेव च।
परसेनाविनाशाय स्वसेनारक्षणाय च ॥६॥

आत्मार्थं च परार्थं च विजयार्थं च षण्मुख।
वेतालाश्च विनाशार्थे भैरवादिप्रशान्तये ॥७॥

समस्तविषनिर्नाशे मुष्टिकुक्षिविधावपि।
शस्त्रास्त्रबाणसंधाने संहारास्त्रादिनाशने ॥८॥

शस्त्रास्त्रस्तम्भने पुत्र तद्वच्छवि(व)विधावपि।
स्तब्धीकरणनिर्नाशे(र्णाशे) मृतकोत्थापनेऽपि च ॥९॥

देशोपद्रवनाशार्थे राष्ट्रभङ्गे समागते।
कोटिकृत्याविनाशार्थे स्वेष्टरक्षणकर्मणि ॥१०॥

हृतनष्टप्रणष्टादिवारुणाग्नेयजातिषु।
पत्रपुष्पफलं शाखाजटात्वक्क्षीरनीरके ॥११॥

महाविषे तैजसे तु विण्मूत्रविजरकृते।
उद्भ्रान्तधूलिनाशार्थे घटकृत्याविनाशने ॥१२॥

जलकृत्याविनाशार्थे स्थलकृत्याविनाशने।
वृक्षकृत्यानाशनार्थे गन्धकृत्याविधावपी(पि) ॥१३॥

महेन्द्रपदनिर्नाशे विरूंडानाशनेऽपि च
भेरुंडनाशनार्थे च रिक्तधावेशभैरवे ॥१४॥

सस्यस्तंभे दारुनाशे मन्त्रमण्डलरोगहृत्।
सप्तब्रह्मास्त्रयोगोऽयं सर्वथा चलति ध्रुवम् ॥१५॥

अमोघमृत्युनाशाय समाश्चर्यकमाय(प)दि।
तं प्रयोगमहायोगं शृणु सावहितो भव ॥१६॥

कुण्डे वा स्थण्डिले वेद्यां चत्वरे पितृकानने ।
चुल्यां सकटया(शकट्यां)वा देवि होतव्यं सर्वकर्मणि ॥१७॥
शुभऋक्षादियोगे तु प्रयोगमादरे(त्)सुत ।
स्वस्तिवाचनमासाद्य द्विजानां वरणं चरेत् ॥१८॥
वगलास्त्रं मध्यमागे करे निष्ठुरबंधनम् ।
पञ्चास्त्रं दक्ष(क्षि)णांशे च मूलास्त्रं होमकर्मणि ॥१९॥
त्रैलोक्यविजयास्त्रं च स्मरेदस्त्रेन्द्रमुत्तमम् ।
निष्ठुरांश्चालयेदेव दीपकास्त्रं प्रयोजयेत्॥२०॥
पूर्वभागे तु पञ्चास्त्रमुत्तरे मुण्डमुत्तमम् ।
महोग्रविजयं दक्षे विजयास्त्रं प्रयोजितम् ॥२१॥
हेलार्क्का चंदला तूर्या तथा पञ्चाङ्गुली प्रिया ।
पश्चिमे कीर्त्तिता विद्या बंधद्वयपुरस्सरम् ॥२२॥
आदौ गणपतिं पूज्य द्वारपूजादिसंयुतम् ।
विप्राणां वरणं कृत्वा वगलादीपमाचरेत् ॥२३॥
मण्डले वगलादीपो(पः)कवचे मूलदीपकः ।
पीताशा(शी) पीतवस्त्राढ्या(ढ्यः) पीतयज्ञोपवीतवान् ॥२४॥
पीताशनी पीतभक्षो पीतशय्यापरायणः ।
हरिद्राक्षेण मणिना सर्वं कार्यं जपादिकम् ॥२५॥
हरिद्राभिः सुरक्ताभिः रोचनाघृतमिश्रितैः ।
बिल्वप्रसूनैर्जुहुयात् सर्वोत्पातनिवारणम् ॥२६॥
अथवा पीतपुष्पैस्तु हरिद्रामधुयोजनम् ।
हरिद्रया दरिद्राणि नश्यन्त्येव न संशयः ॥२७॥
अनेन योगच(व)र्येण सर्वोत्पातनिवारणम् ।
पीताभरणभूषाढ्यं (ढ्यः) पीतशालानिवासकृत् ॥२८॥
शतमष्टोत्तरशतं त्रिशतं च सहस्रकम् ।
त्रिसहस्रं पञ्च तथा दिग्विंशत्यादिरेव च ॥२९॥
पञ्चविंशच्च पञ्चाशत् सहस्रं लक्षमानकम् ।
लक्षोपरि महेशानि न होमोऽस्ति महीतले ॥३०॥
सुन्दर्यां कालिकायां च वैदिके कोटिमात्रकम् ।
होमस्य तु दशांशेन तर्पणं मार्ज्जनं तथा ॥३१॥

सुरया तर्प्पणं पुत्र तेन मार्ज्जनमाचरेत् ।
अभिषेको विप्रभोज्यं साङ्गयोगं प्रसिद्ध्यति ।।३२।।

नातः परतरो योगो विद्यते भुवि मण्डले ।
सर्व्वकर्म्मविनाशार्थं विषनाशार्थमद्भुतम् ।।३३।।

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ।।३४।।

इति संक्षेपतः प्रोक्तं तोषयेद्दक्षिणादिना ।
प्रयोगस्योपसंहार (रः) कर्त्तव्यः सिद्धिमिच्छता ।।३५।।

इति षड्विद्यागमे सांख्यायनतन्त्रे
पञ्चत्रिंशत् (चतुस्त्रिंशत्) पटलः ।।३५।।

परिशिष्टम्—(क)

ऋष्यादिन्यासध्यानादियुताः

॥ सांख्यायनतन्त्रगता मन्त्राः ॥

१. एकाक्षरीबगलामन्त्रः—ह्लीं ।

ॐ अस्य श्रीबगलामुख्येकाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीछन्दः श्रीबगलामुखी देवता लँ बीजं, ह्लीं शक्तिः, इँ[1] कीलकं श्रीबगलामुखीदेवताम्बा-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—ब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, लँ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, रँ कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूं मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुम्, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

ध्यानम्—वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति,
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ।
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रिणा यन्त्रितः,
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥

[पञ्चमः पटलः— पृष्ठ—१२, १३]

२. श्रीबगलाषट्त्रिंशदक्षरीविद्यामन्त्रः—ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ।

ॐ अस्य श्रीबगलामुखीषट्त्रिंशदक्षरीविद्यामहामन्त्रस्य श्रीनारदऋषिः, बृहतीछन्दः,[2] श्रीबगलामुखीदेवता, लँ बीजं, हुँ शक्तिः, ईँ[3] कीलकं, श्रीबगला-मुखीदेवताप्रसादसिद्ध्यर्थे जपे विनियोगः ।

---

१. 'रँ' इत्यन्यत्र । २. 'अनुष्टुप्छन्दः' इत्यन्यत्र दृश्यते । ३. 'रँ' इत्यन्यत्र ।

ऋष्यादिन्यासः—श्रीनारदर्षये नमः शिरसि, बृहतीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः, ईं कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धि विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लीं सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुँ, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धि विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ।

ध्यानम्—चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ।
त्रिशूलं पानपात्रं च गदां जिह्वां च बिभ्रतीम् ॥
बिम्बोष्ठीं कम्बुकण्ठीं च समपीनपयोधराम् ।
पीताम्बरां मदाघूर्णां ध्यायेद् ब्रह्मास्त्रदेवताम् ॥

[सप्तमः पटलः—पृष्ठ-१६-१७]

३. श्रीबगलामुखीगायत्रीमन्त्रः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे स्तम्भन-बाणाय धीमहि तन्नो बगला प्रचोदयात् ।

ॐ अस्य श्रीबगलागायत्रीमन्त्रस्य ब्रह्मा ऋषिः, गायत्रीछन्दः, ब्रह्मास्त्र-बगलादेवता, ॐ बीजं, ह्रीं[1] शक्तिः, विद्महे कीलकं, श्रीबगलामुखीदेवताप्रसाद-सिद्धये जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीब्रह्मास्त्रबगलामुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, विद्महे कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे अङ्गुष्ठाभ्यां नमः, स्तम्भनबाणाय धीमहि तर्जनीभ्यां स्वाहा, तन्नो बगला प्रचोदयात् मध्यमाभ्यां वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे अनामिकाभ्यां हुम्, स्तम्भनबाणाय धीमहि कनिष्ठिकाभ्यां वौषट्, तन्नो बगला प्रचोदयात् करतलकरपृष्ठाभ्यां फट् ।

---

१. 'ह्लीं' इत्यपि पाठः ।

हृदयादिन्यासः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे हृदयाय नमः, स्तम्भनबाणाय धीमहि शिरसे स्वाहा, तन्नो बगला प्रचोदयात् शिखायै वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे कवचाय हुम्, स्तम्भनबाणाय धीमहि नेत्रत्रयाय वौषट्, तन्नो बगला प्रचोदयात् अस्त्राय फट् ।

ध्यानं पूर्ववत् ।

[द्वादशः पटलः—पृष्ठ-२९]

४. **पञ्चपञ्चाशदक्षरो बगलामुखीपञ्चास्त्रमन्त्रः**—ॐ ह्लीं हूं ग्लौं बगलामुखि ह्लां ह्लीं ह्लूं सर्वदुष्टानां ह्लें ह्लौं ह्लः वाचं मुखं पदं स्तम्भय स्तम्भय ह्लः ह्लौं ह्लें जिह्वां कीलय ह्लूं ह्लीं ह्लां बुद्धिं विनाशय ग्लौं हूं ह्लीं ॐ स्वाहा ।[१]

ॐ अस्य श्रीबगलामुखीपञ्चास्त्रमहामन्त्रस्य वसिष्ठऋषिः, पङ्क्तिश्छन्दः, रणस्तम्भनकारिणी बगलामुखी देवता, लँ बीजं, ह्लीं शक्तिः, रं कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीनारदऋषये नमः शिरसि, श्रीबगलामुखीदेवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः ईं कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुम्, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासः ।

ध्यानम्—पीताम्बरधरां देवीं द्विसहस्रभुजान्विताम् ।
सान्द्रजिह्वां गदां चास्त्रं धारयन्तीं शिवां भजेत् ॥

[पञ्चदशः पटलः—पृष्ठ ३८-३९]

५. **अष्टपञ्चाशदक्षर उल्कामुख्यस्त्रमन्त्रः**—ॐ ह्लीं ग्लौं बगलामुखि ॐ ह्लीं ग्लौं सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय ॐ ह्लीं ग्लौं बुद्धिं विनाशय ॐ ह्लीं ग्लौं ह्लीं ॐ स्वाहा ।[२]

---

१. "ॐ ह्लीं हूं ग्लौं बगलामुखि ह्लां ह्लीं ह्लूं सर्वदुष्टानां ह्लें ह्लौं ह्लः वाचं मुखं पदं स्तम्भय ह्लः ह्लौं ह्लें जिह्वां कीलय ह्लां ह्लीं ह्लां बुद्धिं विनाशय ह्लां ह्लीं ह्लूं ग्लौं हूं ह्लीं ॐ स्वाहा" इत्येवंविधो मन्त्रोऽप्यन्यत्र दृश्यते ।

२. "ॐ ह्लीं ग्लौं बगलामुखि सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय कीलय ॐ ह्लीं ग्लौं बुद्धिं नाशय नाशय ॐ ह्लीं ग्लौं स्वाहा" इत्यपि मन्त्रभेदो दृश्यतेऽन्यत्र ।

ॐ अस्य श्रीउल्कामुख्यस्त्रमन्त्रस्य श्रीअग्निवराह[1] ऋषिः, ककुप्[2] छन्दः, श्रीउल्कामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, ग्लौं कीलकं, जगत्स्तम्भनकारिणी श्रीउल्कामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीवराहर्षये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, श्रीउल्कामुखीदेवतायै नमो हृदि, ह्लीं बीजाय नमो गुह्ये, स्वाहाशक्तये नमः पादयोः, ग्लौं कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—विलयानलसंकाशां वीरां वेदसमन्विताम् ।
त्रिराणमयीं महादेवीं स्तम्भनार्थं भजाम्यहम् ॥

[पञ्चदशः पटलः—पृष्ठ-३६]

६. षष्टिवर्णात्मकः श्रीजातवेदमुख्यस्त्रमन्त्रः—ॐ ह्लीं ह्सौं ह्लीं ॐ बगलामुखि सर्वदुष्टानां ॐ ह्लीं ह्सौं ह्लीं ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं ह्सौं ह्लीं ॐ जिह्वां कीलय ॐ ह्लीं ह्सौं ह्लीं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं ह्सौं ॐ स्वाहा ।[3]

ॐ अस्य श्रीजातवेदमुख्यस्त्रमन्त्रस्य श्रीकालाग्निरुद्र ऋषिः, पंक्तिश्छन्दः, श्रीजातवेदमुखी देवता, ॐ बीज, ह्लीं[4] शक्तिः, हूँ कीलकम्, मम श्रीजातवेदमुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीकालाग्निरुद्रर्षये नमः शिरसि, पंक्तिच्छन्दसे नमो मुखे, श्रीजातवेदमुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, हूँ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः—

ध्यानम्—जातवेदमुखीं देवीं देवतां प्राणरूपिणीम् ।
भजेऽहं स्तम्भनार्थं च स्तंभिनीं[5] विश्वरूपिणीम् ॥

[षोडशः पटलः-पृष्ठ-४०-४१]

---

१. 'यज्ञवाराह' इत्यपि पाठः । २. 'अनुष्टुप्' इत्यन्यत्र ।

३. मन्त्रोऽयं सूत्रानुसारेण तु द्वाषष्टिवर्णात्मको जायते किन्त्वन्यत्र निम्नोद्धृतरीत्या दृश्यते षष्टिवर्णः—
"ॐ ह्लीं ह्रौं ह्लीं बगलामुखि सर्वदुष्टानां ॐ ह्लीं ह्रौं ह्लीं ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं ह्रौं ह्लीं ॐ जिह्वां कीलय ॐ ह्लीं ह्रौं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं ह्रौं ह्लीं ॐ स्वाहा ॥

४. 'ह्रीं' इत्यपि पाठः । ५. चिन्मयीमिति पाठः क्वचित् ।

७. **विंशोत्तरशतवर्णात्मको ज्वालामुख्यस्त्रमन्त्रः**—ॐ ह्लीं राँ रीं रूँ रैं रौँ प्रस्फुर प्रस्फुर बगलामुखि[1] ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर सर्वदुष्टानां ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर वाच मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर जिह्वां कीलय कीलय ॐ ह्लीं रां रीं रूँ रैं रौं प्रस्फुर प्रस्फुर बुद्धिं विनाशय विनाशय ॐ ह्लीं रां रीं रूँ रैँ रौं प्रस्फुर प्रस्फुर स्वाहा ।[2]

ॐ अस्य श्रीज्वालामुख्यस्त्रमन्त्रस्य श्रीअत्रि ऋषिर्गायत्री छन्दः, श्रीज्वालामुखी देवता, ॐ बीजं ह्लीं शक्तिः, हुँ कीलकं श्रीज्वालामुखीदेवनाम्बाप्रसादसिद्धयर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्री अत्रिऋषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीज्वालामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, हुँ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः

ध्यानम्—ज्वलत्पद्मासनायुक्तां कालानलसमप्रभाम् ।
चिन्मयीं स्तम्भिनीं देवीं भजेऽहं विधिपूर्वकम् ।।

[षोडशः पटलः—पृष्ठ–४१]

८. **षडुत्तरशताधिकवर्णात्मकः श्रीबृहद्भानुमुख्यस्त्रमन्त्रः**—ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बगलामुखि ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ जिह्वां कीलय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बुद्धिं नाशय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ ह्लीं ॐ स्वाहा ।[3]

१. एतत्पदस्थाने 'ज्वालामुखि' पदं सूत्रे वर्त्तते किन्त्वस्य ग्रहणान्मंत्रे एकाक्षरन्यूनता स्यादतस्तत्पदमेवात्र संगृहीतम् ।

२. सूत्रे तु 'वह्निबीजं च पञ्चकं' इति दर्शनात्त्वत्र 'रं रं रं रं रं' इति बीजानि ग्राह्याणि किन्तूपर्युक्तबीजानामन्यत्रापि व्यवहारादत्रापि स्वीकृतानीत्यूह्यानि

३. अन्यत्रैष मन्त्रश्चतुरुत्तरशतवर्णात्मकोऽपि दृश्यते यथा--ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं बगलामुखि ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लां ह्लैं ह्लूं ह्लैं ह्लौं ह्लूं जिह्वां कीलय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं बुद्धिं नाशय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं स्वाहा ।।

ॐ अस्य श्रीवृहद्भानुमुख्यस्त्रमन्त्रस्य श्रीसविता ऋषिः, गायत्री छन्दः, श्रीबृहद्भानुमुखी देवता, ह्लीं बीजं, ह्रों शक्तिः, ॐ कीलकं, श्रीबृहद्भानुमुखी-देवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्री सवितृषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीवृहद्भानुमुखीदेवतायै नमो हृदये, ह्लीं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—कालानलनिभां देवीं ज्वलत्पुञ्जशिरोरुहाम् ।
कोटिबाहुसमायुक्तां वैरिजिह्वासमन्विताम् ॥१॥
स्तम्भनास्त्रमयीं देवीं दृढपीनपयोधराम् ।
मदिरामदसंयुक्तां वृहद्भानुमुखीं भजे ॥२॥

[सप्तदशः पटलः- पृष्ठ-४२—४३]

६. श्रीबगलामुखीशताक्षरीमहामन्त्रः—ह्लीं ऐं ह्रीं क्लीं श्रीं ग्लौं ह्लीं बगलामुखि स्फुर स्फुर सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय प्रस्फुर प्रस्फुर विकटाङ्गि घोररूपि जिह्वां कीलय महाभ्रमकरि बुद्धिं नाशय विराण्मयि[1] सर्वप्रज्ञामयि प्रज्ञां नाशय उन्मादीकुरु[2] कुरु मनोपहारिणि ह्लीं ग्लौं श्रीं क्लीं ह्रीं ऐं ह्लीं स्वाहा ॥

ॐ अस्य श्रीबगलामुखीशताक्षरीमहामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, जगत्स्तम्भनकारिणी श्रीबगलामुखी देवता, ह्लीं बीजं, ह्रीं शक्तिः, ऐं कीलकं, जगत्स्तम्भनकारिणी श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—पीताम्बरधरां सौम्यां पीतभूषणभूषिताम् ।
स्वर्णसिंहासनस्थां च मूले कल्पतरोरधः ॥१॥
वैरिजिह्वाभेदनार्थं छुरिकां[3] बिभ्रतीं शिवाम् ।
पानपात्रं गदां पाशं धारयन्तीं भजाम्यहम् ॥२॥

(सप्तदशः पटलः-- पृष्ठ-४४--४५)

१. 'विरामय' इत्यपि पाठः [illegible] 'उन्मादं कुरु' इति पाठोऽपि दृश्यते । ३. 'क्षुरिकां' इति पाठोऽन्यत्र ।

१०. अष्टाविंशत्युत्तरैकशताक्षरः श्रीबगलामुखीपरविद्याभेदनमन्त्रः[1]—ॐ ह्लीं श्रीं ह्रीं 'ग्लौं ऐं क्लीं हुँ क्षीं'[2] बगलामुखि परप्रयोगं ग्रस ग्रस ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं ब्रह्मास्त्ररूपिणि परविद्याग्रसिनि भक्षय भक्षय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं परप्रज्ञाहारिणि प्रज्ञां भ्रंशय भ्रंशय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं स्तम्भनास्त्ररूपिणि बुद्धिं नाशय नाशय पञ्चेन्द्रियज्ञानं भक्ष भक्ष ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं बगलामुखि हुँ फट् स्वाहा ।[2]

ॐ अस्य श्रीपरविद्याभेदिनीबगलामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, परविद्याभक्षिणी श्रीबगलामुखी देवता, ग्राँ बीज, ह्लीं शक्तिः क्रों कीलकं, श्रीबगलादेवीप्रसादसिद्धिद्वारा परविद्याभेदनार्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, परविद्याभक्षिणीश्रीबगलामुखीदेवतायै नमो हृदये, ग्रां बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ग्राँ ह्लीं क्रों अङ्गुष्ठाभ्यां नमः, वद वद तर्जनीभ्यां स्वाहा, वाग्वादिनि मध्यमाभ्यां वषट्, स्वाहा अनामिकाभ्यां हुँ, ऐं क्लीं सौं कनिष्ठिकाभ्यां वौषट्, ह्लीं करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ग्राँ ह्लीं क्रों हृदयाय नमः, वद वद शिरसे स्वाहा, वाग्वादिनि शिखायै वषट्, स्वाहा कवचाय हुँ, ऐं क्लीं सौं नेत्रत्रयाय वौषट्, ह्लीं अस्त्राय फट् ।

ध्यानम्— सर्वमन्त्रमयीं देवीं सर्वाकर्षणकारिणीम् ।
सर्वविद्याभक्षिणीं च भजेऽहं विधिपूर्वकम् ॥

[विंशः पटलः—पृष्ठ-५४-५५]

११. त्रिचत्वारिंशदक्षरो बगलास्त्रमन्त्रः—ॐ[3] ह्लीं हुं ग्लौं ह्लीं बगलामुखि मम शत्रून् ग्रस ग्रस खाहि खाहि भक्ष भक्ष शोणितं पिब पिब बगलामुखि ह्लीं ग्लौं हुं 'फट् स्वाहा'[4] ।

---

१. सूत्रानुसारेण वर्णोद्धारावयं मंत्रः सप्तविंशोत्तरशताक्षर एव भवति । २. 'ग्लौं हुं ऐं क्लीं क्षीं' तथा 'युं एं क्लीं हुँ क्ष्मीं' इति पाठभेदौ क्वचिद्दृश्येते ।

३. यद्यपि पुस्तके तु 'ॐ' शब्दस्योपयोगो नावलोक्यते, न चैतादृश एव 'स्वाहा' शब्दव्यवहारस्तथापि शब्दद्वयी अत्यावश्यकी संभाव्या वर्णसंख्यानुपूरकत्वात् ४. रा.कृ. पुस्तके 'फट्-स्वाहा' स्थाने 'ह्लीं स्वाहा' इति दृश्यते । अत्र पुस्तकेऽप्ययं मन्त्रो द्विचत्वारिंशदक्षरात्मक एव गृहीतः किन्त्वसौ ऋष्यादिन्यासे 'फट् कीलक' मिति ग्रहणावसाधुरेव प्रतीयते ।

ॐ अस्य श्रीबगलास्त्रमन्त्रस्य श्रीदुर्वासा ऋषिः, अनुष्टुप् छन्दः, अस्त्र-रूपिणीश्रीबगलामुखी देवता, ग्लौं बीजं, ह्रीं शक्तिः, फट् कीलकं श्रीअस्त्र-रूपिणीबगलाम्बाप्रसादसिद्धयर्थे जपे विनियोगः।

ऋष्यादिन्यासः—श्रीदुर्वाससे ऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, अस्त्ररूपिण्यै श्रीबगलादेवतायै नमो हृदये, ग्लौं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, फट् कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, बगलामुखि तर्जनीभ्यां स्वाहा, सर्वदुष्टानां मध्यमाभ्यां वषट्, वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लीं हृदयाय नमः, बगलामुखि शिरसे स्वाहा, सर्वदुष्टानां शिखायै वषट्, वाचं मुखं पदं स्तम्भय कवचाय हुँ, जिह्वां कीलय नेत्रत्रयाय वौषट्, बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ।

ध्यानम्—चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ।
जिह्वां खड्गं पानपात्रं 'गदां धारयन्तीं पराम्'[१] ॥१॥
पीताम्बरधरां देवीं पीतपुष्पैरलङ्कृताम् ।
बिम्बोष्ठीं चारुवदनां मदाघूर्णितलोचनाम् ॥२॥
सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ।
भजेऽहं चास्त्रबगलां सर्वाकर्षणकर्मसु ॥३॥

[द्वाविंशः पटलः—पृष्ठ-५९-६०]

१२. **श्रीबगलाचतुरक्षरीमन्त्रः**—ॐ आँ ह्लीं क्रों । ॐ अस्य श्रीबगला-चतुरक्षरीमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगला देवता, ह्लीं बीजं, आँ शक्तिः, क्रों कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्धयर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलादेवतायै नमो हृदये, ह्लीं बीजाय नमो गुह्ये, आं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूं मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः अस्त्राय फट् ।

---

१. '—' 'गदामस्त्रं च बिभ्रतीं' तथा च 'गदां धारयन्तीं शिवाम्' इति पाठभेदो क्वचित् ।

१०. अष्टाविंशत्युत्तरैकशताक्षरः श्रीबगलामुखीपरविद्याभेदनमन्त्रः[1]—ॐ [illegible]

ह्लीं श्रीं ह्रीं 'ग्लौं ऐं क्लीं हुँ क्षीं'[2] बगलामुखि परप्रयोगं ग्रस ग्रस ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं ब्रह्मास्त्ररूपिणि परविद्याग्रसिनि भक्षय भक्षय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं परप्रज्ञाहारिणि प्रज्ञां भ्रंशय भ्रंशय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं स्तम्भनास्त्ररूपिणि बुद्धिं नाशय नाशय पञ्चेन्द्रियज्ञानं भक्ष भक्ष ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं बगलामुखि हुँ फट् स्वाहा ।[2]

ॐ अस्य श्रीपरविद्याभेदिनीबगलामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, परविद्याभक्षिणी श्रीबगलामुखी देवता, ग्राँ बीज, ह्रीं शक्तिः क्रों कीलकं, श्रीबगलादेवीप्रसादसिद्धिद्वारा परविद्याभेदनार्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, परविद्याभक्षिणीश्रीबगलामुखीदेवतायै नमो हृदये, ग्रां बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ग्राँ ह्रीं क्रों अङ्गुष्ठाभ्यां नमः, वद वद तर्जनीभ्यां स्वाहा, वाग्वादिनि मध्यमाभ्यां वषट्, स्वाहा अनामिकाभ्यां हुँ, ऐं क्लीं सौं कनिष्ठिकाभ्यां वौषट्, ह्लीं करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ग्राँ ह्रीं क्रों हृदयाय नमः, वद वद शिरसे स्वाहा, वाग्वादिनि शिखायै वषट्, स्वाहा [illegible]

अस्त्राय फट् [illegible]

[illegible]

ऋष्यादिन्यासः—[illegible] नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, क्रौं कीलकाय नमः सर्वाङ्गे ।

[illegible]न्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, [illegible]माभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां [illegible]ः करतलकरपृष्ठाभ्यां फट् ।

[illegible]यादिन्यासः—ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं [illegible]षट्, ॐ ह्लैं कवचाय हुँ, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः [illegible] फट् ।

[illegible]सुवर्णशैलविलसत्० इत्यपि क्वचित् । २. यद्यपीदं सूत्रे नैव सूत्रितं किन्त्वनेन विनाऽयं मंत्रः एकोनाशीत्यक्षरात्मकः स्यादत एवात्र स्वीकृतम् ३. 'ग्लौं' इति शक्तिवाराहबीजस्थाने रा० पुस्तके भूवाराहबीजं 'ह्लूं' इति वर्त्तते । ४. 'सान्निध्य'मपीति पाठोऽन्यत्र ।

हृदयादिन्यासः—ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुं, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

ध्यानम्—कुटिलालकसंयुक्तां मदाघूर्णितलोचनाम् ।
मदिरामोदवदनां प्रवालसदृशाम्बराम् ॥१॥
सुवर्णशैलसुप्रख्यकठिनस्तनमण्डलाम्[1] ।
दक्षिणावर्त्तसन्नाभिसूक्ष्ममध्यमसंयुताम् ॥२॥
रम्भोरुपादपद्मां तां पीतवस्त्रसमावृताम् ।

[पञ्चविंशः पटलः—पृष्ठ-६७-६८]

१३. **अशीत्यक्षरात्मकः श्रीबगलाहृदयमन्त्रः**—ॐ[2] आं ह्लीं क्रों ग्लौं[3] हुं ऐं क्लीं श्रीं ह्रीं बगलामुखि आवेशय आवेशय आं ह्लीं क्रों ब्रह्मास्त्ररूपिणि एहि एहि आं ह्लीं क्रों मम हृदये आवाहय आवाहय सन्निधिं[4] कुरु कुरु आं ह्लीं क्रों मम हृदये चिरं तिष्ठ तिष्ठ आं ह्लीं क्रों हुं फट् स्वाहा ।

अस्य मंत्रस्य ऋष्यादिन्यास-ध्यानादयो नैवोल्लिखिताः पुस्तके ।

[अष्टाविंशः पटलः—पृष्ठ-७७-७८]

१४. **श्रीबगलाष्टाक्षरात्मको मन्त्रः**—ॐ आं ह्लीं क्रों हुं फट् स्वाहा ।

ॐ अस्य श्रीबगलाष्टाक्षरात्मकमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगलामुखी देवता, ॐ बीजं, ह्रीं शक्तिः, क्रों कीलकं श्रीबगलादेवताम्बाप्रसादसिद्धयर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूं मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुं, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुं, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

---

१. सुवर्णशैलविलसत्० इत्यपि क्वचित् । २. यद्यपीदं सूत्रे नैव सूत्रितं किन्त्वनेन विनाऽयं मंत्रः एकोनाशीत्यक्षरात्मकः स्यादत एवात्र स्वकृतम् ३. 'ग्लौं' इति शक्तिवाराहबीजस्थाने रा० पुस्तके भूवाराहबीजं 'ह्लूं' इति वर्त्तते । ४. 'सान्निध्य'मपीति पाठोऽन्यत्र ।

ध्यानम्—युवतीं[1] च मदोद्रिक्तां[2] पीताम्बरधरां शिवाम् ।
पीतभूषणभूषाङ्गीं समपीनपयोधराम् ।।१।।
मदिरामोदवदनां प्रवालसदृशाधराम् ।
'पानपात्रं च शुद्धिं च'[3] बिभ्रतीं बगलां स्मरेत् ।।२।।

[त्रिंशः पटलः-पृष्ठ-८१]

१५. **एकोनषष्टिवर्णात्मकः श्रीबगलोपसंहारविद्यामन्त्रः**—ग्लौं हुं ऐं ह्रीं[4] श्रीं कालि कालि महाकालि एहि एहि कालरात्रि आवेशय आवेशय महामोहे महामोहे स्फुर स्फुर प्रस्फुर प्रस्फुर स्तंभनास्त्रशमनि हुं फट् स्वाहा ।[5]

ॐ अस्य श्रीबगलास्त्रोपसंहारविद्यामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, स्तंभनास्त्रविभेदिनी श्रीकालिका देवता, क्रीं बीजं, फट् शक्तिः, स्वाहा कीलकं श्रीबगलाप्रसादसिद्धिद्वारा ब्रह्मास्त्रोपसंहारार्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, स्तम्भनास्त्रविभेदिनीश्रीकालिकादेवतायै नमो हृदये, क्रीं बीजाय नमो गुह्ये, फट्शक्तये नमः पादयोः, स्वाहा कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ क्रां अङ्गुष्ठाभ्यां नमः, ॐ क्रीं तर्जनीभ्यां स्वाहा, ॐ क्रूं मध्यमाभ्यां वषट्, ॐ क्रैं अनामिकाभ्यां हूं, ॐ क्रौं कनिष्ठिकाभ्यां वौषट्, ॐ क्रः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ क्रां हृदयाय नमः, ॐ क्रीं शिरसे स्वाहा, ॐ क्रूं शिखायै वषट्, ॐ क्रैं कवचाय हूं, ॐ क्रौं नेत्रत्रयाय वौषट्, ॐ क्रः अस्त्राय फट् ।

ध्यानम्—कालीं करालवदनां कलाधरधरां शिवाम् ।
स्तम्भनास्त्रैकसंहारीं ज्ञानमुद्रासमन्विताम् ।।१।।
वीणापुस्तकसंयुक्तां कालरात्रिं नमाम्यहम् ।
बगलास्त्रोपसंहारीदेवतां विश्वतोमुखीम् ।।२।।
भजेऽहं कालिकां देवीं जगद्वशकरां शिवाम् ।

[द्वात्रिंशः पटलः—पृष्ठ—८७-८८]

---

१. 'यौवना' मित्यन्यत्र । २. 'मदोन्मत्ता' मित्यपि पाठः । ३. 'वैरिजिह्वां पानपात्रं' इति पाठोऽपि दृश्यते । ४. 'क्रीं' इत्यन्यत्र । ५. एष मन्त्रस्तु रा० पुस्तकधृतसूत्रोद्धार-स्वरूपः । पुस्तकस्थसूत्रात्तु त्रिपञ्चाशद्वर्णात्मक एष मंत्रो जायते 'कालरात्रि' पदान्ते 'आवेशय आवेशय' इति पदद्वयविरहात् ।

१६. द्वात्रिंशद्वर्णात्मकस्तार्क्ष्यमालामन्त्रः[1]—ॐ क्षीं नमो भगवते क्षीं पक्षिराजाय सर्वाभिचारध्वंसकाय क्षीमों फट् स्वाहा ।

[बगलोत्कीलनविधिः]—

प्रणवं पूर्वमुच्चार्य कूर्चयुग्मं समुच्चरेत् ।
कामत्रयं वाग्भवं च लज्जाषट्कं समुच्चरेत् ॥१॥
क्रींकाराष्टकमुच्चार्य बगलाशापमुच्चरेत् ।
उत्कीलनपदद्वन्द्वं अग्निजायां समुद्धरेत् ॥२॥
शापोद्धारप्रकारोऽयं तन्त्रराजे प्रकीर्त्तितः ।
उत्कीलिता ब्रह्मविद्या मन्त्रेनानेन सिद्धयति ॥३॥

स्पष्टार्थः—ॐ हूँ हूँ क्लीं क्लीं क्लीं ऐं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं बगलाशापमुत्कीलय उत्कीलय स्वाहा ॥

परिशिष्टम् (ख)

॥ अथ वज्रपञ्जरकवचस्तोत्रम् ॥

ध्यात्वा मनसा सम्पूज्य मुद्राः प्रदर्श्य पञ्जरं न्यसेत्—

शिव उवाच—

पञ्जरं तत्प्रवक्ष्यामि देव्याः पापप्रणाशनम् ।
यं प्रविश्य न बाधन्ते बाणैरपि नरा भुवि ॥१॥

ॐ ऐं ह्रं श्रीं श्रीमत्पीताम्बरा देवी बगला बुद्धिवर्द्धिनी ।
पातु मामनिशं साक्षात् सहस्रार्कयुतद्युतिः ॥२॥

शिखादिपादपर्य्यन्तं वज्रपञ्जरधारिणी ।
श्रीब्रह्मास्त्रविद्या या पीताम्बरविभूषिता ॥३॥

बगला मामवत्वत्र मूर्द्धभागं महेश्वरी ।
कामाङ्कुशा कला पातु बगला शास्त्रबोधिनी ॥४॥

---

1. अयं मन्त्रः पुस्तके द्वात्रिंशाक्षर एवोद्घोषितः किन्तूद्धारात्त्रिंशाक्षर एव संभवति स चोपरि प्रदर्शित एव । रा० पुस्तके चैष एव मंत्रः षड्विंशाक्षर एव स्वीकृतोऽस्ति यथा—'ॐ क्षीं ॐ नमो भगवते पक्षिराजाय अभिचारध्वंसकाय हुँ फट् स्वाहा'

पीताम्बरा सहस्राक्षी ललाटे कामितार्थदा ।
ॐ ऐं ह्लीं श्रीं श्रोः [मे]पातु पीताम्बरसुधारिणी ॥५॥
कर्णयोश्चैव युगपदतिरत्नप्रपूजिता ।
ॐ ऐं ह्लीं श्रीं पातु बगला नासिकां मे गुणाकरा ॥६॥
पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी ।
ॐ ऐं ह्लीं श्रीं पातु बगला ब्रह्मविष्ण्वादिसेविता ॥७॥
पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद्भ्रुवोः ।
ॐ ऐं ह्लीं श्रीं पातु बगला बलदा पीतवस्त्रधृक् ॥८॥
अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगा मम ।
ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥९॥
गले हस्ते तथा बाहौ युगपद्व्द्धिदा सताम् ।
ॐ ऐं ह्लीं श्रीं पातु बगला पीतवस्त्रावृता घना ॥१०॥
जङ्घायां च तथा चोरौ गुल्फयोश्चातिवेगिनी ।
अनुक्तमपि यत्स्थानं त्वक्केशनखलोम मे ॥११॥
असृग्मांसं तथास्थीनि सन्धयश्चाति मे परा ।

श्रीशिव उवाच—

इत्येतद्वरदं गोप्यं कलावपि विशेषतः ॥१२॥
पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् ।
पञ्जरं यः पठेद्भक्त्या स विघ्नैर्नाभिभूयते ॥१३॥
अव्याहतगतिश्चापि ब्रह्मविष्ण्वादिसत्पुरे ।
स्वर्गे मर्त्ये च पाताले नारयस्तं कदाचन ॥१४॥
प्रबाधन्ते नरं व्याघ्राः पञ्जरस्थं कदाचन ।
अतो भक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि ॥१५॥
पठनीयं प्रयत्नेन सर्वानर्थविनाशनम् ।
महादारिद्र्यशमनं सर्वमाङ्गल्यवर्द्धनम् ॥१६॥
विद्याविनयसत्सौख्यं महासिद्धिकरं परम् ।
इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम् ॥१७॥
पठेत् स्मरेद् ध्यानसंस्थः स जीयान्मरणं नरः ।
यः पञ्जरं प्रविश्यैवं मन्त्रं जपति वै भुवि ॥१८॥

कौलिको वा कौशिको वा व्यासवद् विचरेद् भुवि ।
चन्द्रसूर्यप्रभुर्भूत्वा वसेत् कल्पायुतं दिवि ॥१६॥

सूत उवाच—

इति कथितमशेषं श्रेयसामादिबीजं,
भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ।
स्मरणमतिशयेन प्रातरेवात्र मर्त्यो,
यदि विशति सदा यः पञ्जरं पण्डितः स्यात् ॥२०॥

इति श्रीपरमरहस्यातिरहस्ये श्रीपीताम्बराया:
पञ्जरं सम्पूर्णम् ॥

श्रीप्रसन्नास्तु ॥ श्रीबगलामुखी प्रीयतां मिति पोष सुदि १३, संवत् १६२२ लिखितं काश्यां दुर्गाबाई इदं पुस्तकम् ॥

परिशिष्टम् (ग)

॥ अथ बगलामुखीत्रैलोक्यविजयं नाम कवचम् ॥

श्रीभैरव उवाच—

शृणु देवि प्रवक्ष्यामि स्वरहस्यं च कामदम् ।
श्रुत्वा गुप्ततम गोप्यं कुरु गुप्तं सुरेश्वरि ॥१॥
कवचं बगलामुख्या: सकलेष्टप्रदं कलौ ।
यत्सर्वं च परं गुह्यं गुप्तं च शरजन्मनः ॥२॥
त्रैलोक्यविजयं नाम कवचेशं मनोरमम् ।
मन्त्रगर्भं मन्त्ररूप सर्वसिद्धिविनायकम् ॥३॥
रहस्यं परमं ज्ञेय साक्षादमृतरूपिणम् ।
ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ ॥४॥
पूर्णमेकोनपञ्चाशद्वर्णमन्त्रमयैर्युतम् ।
त्वद्भक्त्या वच्मि देवेशि गोपनीयं स्वयोनिवत् ॥५॥

श्रीदेव्युवाच—

भगवन् करुणासागर विश्वनाथ सुरेश्वर ।
कर्मणा मनसा वाच्यं न वच्म्यग्निभुवोऽपि च ॥६॥

भैरव उवाच—

त्रैलोक्यविजयाख्यस्य कवचस्यास्य पार्वति ।
मन्त्रगर्भस्य मु(सू?) त्तस्य ऋषिर्देवस्तु भैरवः ॥७॥

उष्णिक् छन्दः समाख्यातं देवी क्लीं (च?) बगलामुखी ।
बीजं क्लीं ओं च शक्तिः स्यात् स्वाहा कीलकमुच्यते ॥८॥

विनियोगः समाख्यातस्त्रिवर्गफलसाधने ।
देवीं ध्यात्वा पठेद्वर्म मन्त्रगर्भं सुरेश्वरि ॥६॥

विना ध्यानेन नो सिद्धिः सत्यं जानीहि पार्वति ।

चन्द्रोद्भासितमूर्द्धजां रिपुरसां मुण्डाक्षमालाकरां,
बगलां पीतस्रगुज्वलां मधुमदारक्तां जटाजूटिनीम् ।
शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासितां,
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे ॥१०॥

ॐ क्लीं मम शिरसि पातु देवी ह्लीं बगलामुखी ।
ॐ क्लीं पातु मे भाले देवी स्तम्भनकारिणी ॥११॥

ॐ अँ इँ हं भ्रुवौ पातु बगला क्लेशहारिणी ।
ॐ हं क्षं पातु मे नेत्रे नारसिंही शुभङ्करी ॥१२॥

ॐ ह्रीं श्रीं पातु मे जङ्घे अं आं इं भुवनेश्वरी ।
ॐ क्लीं सः मे श्रुती पातु ईं उं ऊं ऋं मुखेश्वरी ॥१३॥

ॐ ह्रीं क्रीं ह्रीं सदाव्यान्मे नासां ॠं लृं सरस्वती ।
ॐ ह्रीं ह्रां मे मुखं पातु लॄं एं ऐं छिन्नमस्तका ॥१४॥

ॐ श्रीं मे अधरौ पातु ओं औं दक्षिणकालिका ।
ॐ ह्रीं ह्रूं मे दन्तान् पातु अं अः मे भद्रकालिका ॥१५॥

ॐ क्रीं श्रीं रसनां पातु कं खं गं घं चरात्मिका ।
ॐ ऐं सौः मे हनौ पातु ङं चं छं जं च जानकी ॥१६॥

ॐ श्रीं ग्रौं (क्लीं) मे गलं पातु झं ञं टं ठं गणेश्वरी ।
ॐ ह्रीं स्कन्धौ सदाव्यान्मे डं ढं णं चैव तोतला ॥१७॥

ॐ ह्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ।
ॐ क्लीं सौः मे स्तनौ पातु धं नं पं परमेश्वरी ॥१८॥

ॐ जूं क्रों मे रक्ष वक्षः फ बं भं भगवासिनी ।
ॐ क्रौं ह्रौं पातु मे कुक्षिं मं यं र चक्रिवल्लभा ॥१९॥

ॐ श्रीं ह्रूं पातु मे पार्श्वौ लं वं लम्बोदरप्रसूः ।
ॐ क्रौं ह्रूं पातु मे नाभिं शं गं षण्मुखपालिनी ॥२०॥

ॐ ऐं सौः पातु मे पृष्ठं सं हं हाटकरूपिणी ।
ॐ क्लीं ऐं पातु मे शिश्नं ळं क्षं हं तत्वरूपिणी ॥२१॥

ॐ क्लीं ह्रूं मे कटिं पातु पञ्चाशद्वर्णमातृका ।
ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥२२॥

ॐ श्रीं ऊरू सदाव्यान्मे इं ईं खं रंगगामिनी ।
ॐ जूं सः पातु मे जानू उं ऊं ग मणवल्लभा ॥२३॥

ॐ श्रीं ह्रीं पातु मे जङ्घे ऋं ॠं घं च महारिणी ।
ॐ श्रीं सः पातु मे गुल्फौ लृं लॄं ङं चं च कालिका ॥२४॥

ॐ ऐं ह्रीं पातु मे सन्धी एं ऐं छं जं जगत्प्रिया ।
ॐ श्रीं क्लीं पातु मे पादौ ओं औं झं ञं भगादरी ॥२५॥

ॐ ह्रीं मे सर्ववपुः पातु अं अः ह्रीं त्रिपुरेश्वरी ।
ॐ श्रीं पूर्वे सदाव्यान्मां अं आँ टं ठं शिखामुखी ॥२६॥

ॐ ह्रीं याम्यां सदाव्यान्मां इ डं ढं णं च तारिणी ।
ॐ ह्रीं मां पातु वारुण्यां ईं तं थं दं च खेश्वरी ॥२७॥

ॐ यं मां पातु कौबेर्यां उं धं नं पं पिलंपिला ।
ॐ श्रीं पातु चैशान्यां ऊं फं बं वैन्दवेश्वरी ॥२८॥

ॐ श्रीं मां पातु चाग्नेय्यां ऋं भं मं यं च योगिनी ।
ॐ ऐं मां पातु नैर्ऋत्यां ॠं रं राजेश्वरी सदा ॥२९॥

ॐ श्रीं मां पातु वायव्यां लृं लं लम्बितकेशिनी ।
ॐ प्रभाते च मां पातु लॄं वं वागीश्वरी सदा ॥३०॥

ॐ मध्याह्ने च मां पातु एं शं शङ्करवल्लभा ।
ॐ ह्रीं क्लीं श्रीं पातु मां सायं ऐं षं शाबरी सदा ॥३१॥

ह्रीं निशादौ च मां पातु ओं सं सागरशायिनी ।
क्लीं निशीथे च मां पातु औं हं हरिहरेश्वरी ॥३२॥

क्लीं ब्राह्मे मां मुहूर्त्तेऽव्यादं ळं त्रिपुरसुन्दरी ।
विस्मारितं च यत्स्थानं वर्जितं कवचेन तु ॥३३॥

ह्लीं तन्मे सकलं पातु अः क्षः क्लीं बगलामुखी ।
इतीदं कवचं गुह्यं मन्त्राक्षरमयं परम् ॥३४॥

त्रैलोक्यविजयं नाम सर्ववर्णमयं स्मृतम् ।
अप्रकाश्यमदातव्यं न श्रोतव्यमवाचकम् ॥३५॥

दुर्जनायाकुलीनाय दीक्षाहीनाय पार्वति ।
न दातव्यं न दातव्यमित्याज्ञा परमेश्वरि ॥३६॥

अदीक्षित उपाध्यायविहीनः शक्तिभक्तिमान् ।
कवचस्यास्य पठनात् साधको दीक्षितो भवेत् ॥३७॥

कवचेशमिदं गोप्यं सिद्धविद्यामयं परम् ।
ब्रह्मविद्यामयमिदं यथाभीष्टफलप्रदम् ॥३८॥

न कस्य कथितं चैतत् त्रैलोक्यविजयेश्वरी ।
यस्य स्मरणमात्रेण देवी सद्यो वशीभवेत् ॥३९॥

पठनाद्धारणाच्चास्य कवचेशस्य साधकः ।
कलौ विचरते वीरो यथा ह्लीं बगलामुखी ॥४०॥

इमं मन्त्रं स्मरन्मन्त्री संग्रामं प्रविशद् यथा ।
त्रिः पठेत् कवचेशन्तु युयुत्सुः साधकोत्तमः ॥४१॥

शत्रून् कालसमानान् तु जित्वा स्वगृहमेष्यति ।
मूर्ध्नि धृत्वा तु कवचं मन्त्रगर्भं तु साधकः ॥४२॥

ब्रह्माद्यानमरान् सर्वान् सहसा वशमानयेत् ।
धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥४३॥

वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः ।
उत्पातेषु च घोरेषु भयेषु विविधेषु च ॥४४॥

रोगेषु कवचेशं च मन्त्रगर्भं पठेन्नरः ।
कर्मणा मनसा वाचा तद्भयं शान्तिमेष्यति ॥४५॥

श्रीदेव्या बगलामुख्याः कवचेशं मया स्मृतम् ।
त्रैलोक्यविजयं नाम पुत्रपौत्रधनप्रदम् ॥४६॥

ऋणहर्त्तारमेतत्स्याल्लक्ष्मीभोगविवर्द्धनम् ।
वन्ध्या धारयते कुक्षौ पुत्रं पश्यति नान्यथा ॥४७॥

मृतवत्सा च विभृत्याथ कवचं बगले सदा ।
दीर्घायुर्व्याधिहीनस्तु तत्पुत्रस्तु भविष्यति ॥४८॥
इतीदं बगलामुख्याः कवचेशं सुदुर्लभम् ।
त्रैलोक्यविजयं नाम न देयं यस्य कस्यचित् ॥४६॥
अकुलीनाय मूढाय भक्तिहीनाय देहिने ।
लोभयुक्ताय देवेशि न दातव्यं कदाचन ॥५०॥
शिष्याय भक्तियुक्ताय गुरुभक्तिपराय च ।
लोभदन्तविहीनाय कवचेशं प्रदीयताम् ॥५१॥
अभक्तेभ्यो विपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः ।
फलं गृहं न चाप्नोति परं च नरकं व्रजेत् ॥५२॥
दीपमुज्ज्वाल्य मूलेन पठेद्वर्मेदमुत्तमम् ।
प्राप्ते कन्यार्कवारे च राजा तद्गृहमेष्यति ॥५३॥
मण्डलेशो महेशानि सत्यं सत्यं न संशयः ।
इदं तु कवचेशं तु मया दिव्यं मगात्मने ॥५४॥
पूजनात् पठनाच्चास्य चतुर्व्वर्गफलप्रदम् ।
गोप्यं गुप्ततरं देवि गोपनीयं स्वयोनिवत् ॥५५॥

इति रुद्रयामले उमामहेश्वरसंवादे बगलामुखीत्रैलोक्यविजयं नाम कवचं सम्पूर्णं श्रीजगदम्बार्पणमस्तु । मिति माघकृष्ण ५ संवत् १९२२ इदं पुस्तकं ।

परिशिष्टम् (घ)

॥ अथ श्रीपीताम्बरारत्नावलीस्तोत्रम् ॥

॥ श्रीगणेशाय नमः ॥ श्रीपीताम्बरायै नमः ॥

ओङ्कारद्वयसम्पुटान्तरपुटं मायास्थिराद्वन्द्वितं,
तन्मध्ये बगलामुखीति विमलं सम्बोधनं सर्वं च ।
दुष्टानामथ वाचमाशु च मुखं[1] संस्तम्भयेत्यक्षरं,
जिह्वां कीलय कीलयेति च[2] लिखेद् बुद्धि तथा नाशय ॥१॥
ब्रह्मास्त्रं सकलार्थसिद्धिजनकं षट्त्रिंशदर्णात्मक-
म्प्रोक्तं पद्मभुवा हिताय जगतां यन्नारदाग्रे पुरा ।

---

1. मु० पदं । 2. चि ।

जीवन्मुक्तपदे विभान्ति सुधियो येषां मुखे भासते,
निर्द्वन्द्वामृतसागरेन्दुकिरणाहाराश्चकोरास्तु ते ॥२॥
ओमित्यादिस्वरूपं[1] जपति तव शिवे शब्दतन्मात्रगर्भा-[2]
वाचो यस्मात् परार्थप्रकटितपटवो वर्णरूपा निरीयुः ।
ब्रह्माद्यैः पञ्चतत्वैः परिवृतमनघं चित्प्रबोधाधिगम्यं,
दुर्ज्ञेयं योगयुक्तैः कथमपि मनसा[3] योगिभिर्गृह्यमाणम् ॥३॥
ह्लीं[4] बीजं 'हृदि यस्य'[5] भाति विमलं लक्ष्मीः स्थिरा तद्गृहे,
धैर्यं तस्य कलेवरेऽपि विलसते[6] दीर्घायुषो भूतले ।
कल्पान्तेष्वपि वृद्धिमेति विमला सद्ब्रह्मवल्ली परा,[7]
शौर्यं स्थैर्यमुपैति तस्य पुरतस्त्रस्यन्ति वादीश्वराः ॥४॥
बद्धं वारिधिमुद्यतो जनकजानाथोऽपि पीताम्बरे !
त्वां ध्यात्वाऽर्णवशोषणे कृतमतिः सेतुं प्रचक्रे द्रुतम् ।
जित्वा रावणमुग्रशत्रुमबलान् बन्दीन् विमुच्याऽमरान्,
कीर्त्तिं लोकसुखोदयां व्यरचयत् कल्पस्थिरामम्बिके ॥५॥
गर्वं खर्वति रङ्कति क्षितिपतिर्मूकायते वाक्पति-
र्वह्निः शीतति दुर्जनः सुजनते पुष्पायते वासुकिः ।
श्रीनित्ये बगले तवाक्षरपदैर्यन्त्रीकृता[8] यन्त्रिताः,
के के नो निपतन्ति [9]त्रस्तमुकुटाश्चन्द्रार्कतुल्या अपि ॥६॥
लावण्यामृतपूरिते तव कृपापाङ्गे निमग्ना नरा
[10]ब्रह्मेशादिदिगीशवृन्दमपि ते जानन्ति गुञ्जोपमम् ।
येषां चेतसि संस्थिताऽसि बगले ! ते विश्वरक्षाक्षमाः,
प्रारब्धं द्रढयन्ति सत्वरतरं विघ्नै रविघ्नीकृताः ॥७॥
मुख्यत्वं समुपैति संसदि तवाऽपाङ्गावलोके नरः,
किं तच्चित्रमहो स्वयं प्रभवते सृष्टिस्थितिध्वंसने ।
यश्चित्ते तव 'भाति मामक इति'[11] त्वद्दर्शनं यस्य वा,
तं सर्वा ह्यणिमादयोऽप्यतितरामाराधयन्ते ध्रुवम् ॥८॥
क्षीणानां[12] बलदायिनीं जलनिधौ 'पोतस्थितौ नाविकां,'[13]
तत्त्राणं[14] घनकुञ्जगह्वरगिरिव्याघ्रादिभीतेष्वपि[15] ।

---

१. ख. ओमित्याद्यं । २. ०गर्भं । ३. तपसा । ४. भ्रू । ५. हृदये वि । ६. भजते । ७. तति: । ८. ० ये निश्चतो । ९. भ्रष्टमु० । १०. ब्रह्मेन्द्रादिविभीशमृतमपि । ११. ख. भक्तिमाशु कुरुते । १२. खिन्नानां । १३. पोतस्थितानां गतिः । १४. स्वं त्राणं । १५. ० सत्वेष्वपि ।

ःवां पीताम्बरधारिणीं 'परशिवां चन्द्रार्द्धचूडां गदा-'[1]
हस्तां वामकरे[2] प्रतीपरसनामुन्मीलयन्तीं[3] भजे ॥९॥

स्वेच्छं[4] ये प्रणमन्ति पादयुगलं पीताम्बरे ! तावकं,
ते वाञ्छाधिकमर्थमाप्य सकलां सिद्धिं भजन्ते पुनः ।
यद्यत्कर्त्तुमुरीकरोति बगले ! त्वत्साधकोऽत्राधुना,
तत्सञ्जातमिवेक्षते तव कृपाऽपाङ्गावलोके क्षणात् ॥१०॥

वाणी[5] सूक्तिसुधारसद्रवमयी सालङ्कृतिस्तन्मुखे,
शापानुग्रहकारिणी कविजनानन्दैकसंवर्द्धिनी ।
व्याकर्तुं क्षमते विशालमतिमांस्त्वत्सेवको वाङ्मयं,[6]
किं चित्रं यदि सृष्टिमाशु रचते ब्रह्माण्डकोटचायते[7] ॥११॥

देवि ! त्वद्भक्तदृष्टया तुहिनगिरिमुखाः पर्वताः पांसुतुल्या
ज्वालामालाश्च चन्द्रामृतकरसदृशाः पुष्पतां यान्ति नागाः ।
मूकत्वं वाक्पतीन्द्राः सरसि समतुलामाश्रयन्ते समुद्रा
राजानो रङ्कभावं रणभुवि रिपवो विद्रवन्ते विशङ्काः ॥१२॥

लेख्यं[8] तावकमन्त्रबीजममलं दुष्टौघसंस्तम्भन,
वश्याकर्षणमारणप्रमथनप्रक्षोभणोच्चाटने ।
व्यक्तं वज्रमिवापरं यदि मुखे जागर्त्ति तस्याग्रतः,
पादान्तः परिसञ्चरन्ति रिपवो ये सप्तद्वीपेश्वराः ॥१३॥

नानारत्नविभूषितामलमणिद्वीपे सुधासागरे,
कल्पानोकहकाननान्तरगता या रत्नवेदी परा ।
तत्राकारितपञ्चप्रेतकमये सिंहासने संस्थितां,
ध्यायेऽहं करुणाकरां हरिहराराध्यामशेषार्थदाम् ॥१४॥

वाग्देवी वदने वसत्यविरतं नेत्रे च लक्ष्मीः करे,
दानं दीनकृपालुता च हृदये वीरत्वमाजौ सदा ।
त्वद्भक्तस्य भवाब्धिपारतरणे तत्त्वोदयो जायते,
तेनेदं नलिनीदलोपरि जलाकारं जगद् भासते ॥१५॥

चञ्चत्काञ्चनतुल्यपीतवसनां चन्द्रावतंसोज्ज्वलां,
केयूराङ्गदहारकुण्डलधरां भक्तोदयायोद्यताम् ।

---

१. परचमूविद्रावणोद्यद्गदा । २. वामकरेण । ३. शत्रुरसन।० । ४. स्फुटं । ५. मुक्ति० । ६. ऽत्राधुना । ७. ०कोटचालये । ८. दृष्ट्वा ।

त्वां ध्यायामि चतुर्भुजां त्रिनयनामुग्रारिजिह्वां करे,
कर्षन्तीमहमम्ब पाहि बगले ! त्राणं त्वमेवासि मे ॥१६॥
मातस्ते महिमानमुग्रमधिकं प्रोक्तं स्वयं मानवै—
र्वाक्यं सन्द्रियते[1] श्रमेण यदि वा शक्त्या गुणाम्भोनिधेः ।
नो निश्शेषतया सुरैरविदितप्रान्तस्य पद्मालये,
तस्मात् सर्वगता त्वमेव सदसद्रूपा सदा गीयते ॥१७॥
खड्गं ताक्ष्यसमोद्यमं[2] प्रकुरुते ताक्ष्यं च खड्गाधिकं,
वान्त[3] स्तम्भयते जलाग्निशमने याऽव्यक्तशक्तिः शिवे ।
तद्बीजं बगलेति मेऽस्तु रसनालग्नं सदैवामलं,
यद्ब्रह्मादिसुदुर्लभं भुवि नरैः सत्प्राक्तनैर्लभ्यते[4] ॥१८॥
स्तम्भत्वं पवनोऽपि[5] याति भवती[6] भक्तस्य पीताम्बरे ।
किं चित्रं यदि वारिधिः स्थलपदं मेरुस्तु माषोपमाम् ।
कल्पानोकहकामधेनुप्रमुखं रत्नैरलिन्दस्थितं[7]—
र्वाञ्छार्थाधिकदानमाशु कुरुते दीनेष्वदीनेष्वपि ॥१९॥
भाग्याद्यस्य मुखे विभाति विमला विद्या विशेषाधिका,
षट्त्रिंशद्भिरथोदिता बहुगुणैर्बीजैस्तु सर्वार्थदा ।
तं सर्वे प्रणमन्ति मानवममी[8] सेन्द्राः सुरा भूसुराः,
[9]क्रान्ताशेषमहोदयं स्वकलनाक्रान्तत्रिलोकालयम्[10] ॥२०॥
यत्किञ्चिद्भुवने विभाति विमलं रत्नं महानन्दनं,[11]
यां यां वृत्तिरुदारतां जनयते यद्यत्परं सुन्दरम् ।
यत्किञ्चिद्भुवनेऽथवा नु[12] महता शब्देन वा कीर्त्यते,[13]
तत्सर्वं तव रूपमेव बगले ! संसारपारप्रदे ॥२१॥
जाग्रत्पूर्णकृपामृतौघभरिते श्रीमत्कटाक्षेक्षणे,
सर्वार्थप्रतिपादकव्रतधरे ये ये निमग्ना नराः ।
तेषां भाग्यमतीन्द्रियं निगदितुं ब्रह्मादयो न क्षमा
ये सङ्कल्पविकल्पमात्ररचनाः प्राणात्यये हेतवः ॥२२॥
हस्ते संगृह्य चापं [14]शरधरनिकरैर्यत्किरातं महाजौ,
पार्थो ब्रह्मास्त्रविद्याभ्यसनपटुमतिर्द्वन्द्वयुद्धे तुतोष ।

१. ख. 'संह्रियते' इत्यपि पाठः । २. 'ताक्ष्यंजयोद्धत' इति पाठः । ३. 'वान्तं' क्वचित् ।
४. 'सत्प्राकृतैर्लभ्यते' इति पाठः । ५. परमोऽपि । ६. पवनो । ७ रत्नैरनेकैः स्थितैः ।
८. ०ममुं । ९. कान्ताशेष० । १०. स्वकलनाक्रान्त्या० । ११. महानन्ददम् । १२. ऽण ।
१३. कीर्त्तिते । १४. शितशर० ।

तत्सर्वं देववृन्दैरथ रिपुनिवहैर्वीक्षितं सिद्धलोकै-
धैर्यं[1] शौर्यं च सर्वं[2] तव वरजनितं भाति पीताम्बरेऽत्र ॥२३॥
पीतां पीतजटाधरां त्रिनयनां पीतांशुकोल्लासिनीं,
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम् ।
हस्तैर्मुद्गरवज्रवैरिरसनां संबिभ्रतीमादरात्,
दीप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तये ॥२४॥
कर्णालम्बितलोलकुण्डलयुगां श्वेतेन्दुमौलिं[3] करैः,
केयूराङ्गदपाशमुद्गरगदावज्रादिकान् बिभ्रतीम् ।
देवीं पीतविभूषणामरिकुलध्वंसोद्यतां ये नरा
ध्यायन्त्याशु लभन्ति सिद्धिमतुलां ते बालिशाः स्युः कथम् ॥२५॥
लब्ध्वा मातरशेषकान्तिभरितानन्दं[4] कृपावीक्षणं,
वर्षीयानपि मोहितुं प्रभवति स्त्रीवृन्दमुन्मीलितुम् ।
किं तच्चित्रमनेकधा भ्रमयते दृष्ट्या त्रिलोकीमिमां,
सूर्येन्दुस्तनधारिणीमपि बलात् कन्दर्पदर्पाधिकः[5] ॥२६॥
यन्त्रं जैत्रमनेकदुःखशमनं पीताम्बरे ! तावक-
मोङ्कारद्वयसम्पुटेन पुटितं शिष्टैस्तथावेष्टितम् ।
तद्बाह्ये स्थिरमाययाष्टपुटितं पाशाङ्कुशाद्यावृतं,
येषां चेतसि 'भाग्यतो निवसते ते विश्वसर्गक्षमाः'[6] ॥२७॥
कर्पूरागुरुचन्दनैर्मृगमदैर्गोरोचनाकेशरै-
स्त्वत्पादाम्बुजमर्चयन्ति बगले![7] ये प्रत्यहं मानवाः ।
ते लब्ध्वा श्रियमद्भुतामपि चिरं भोगांश्च भुक्त्वाऽवनौ,
सायुज्यालयमाविशन्ति परमानन्दोऽस्ति यत्राधिकः ॥२८॥
लब्ध्वा पादयुगे रतिं तव शिवे क्षुद्रोऽपि देवेन्द्रता-
मासाद्यामरसुन्दरीभिरमलैर्भोगैर्दिवि क्रीडति ।
ये हित्वा तव भक्तिमन्यभजनानन्दाश्चिरं ते नरा
भ्रष्टा धर्मपराङ्मुखा भ्रमधियो भारं वहन्ते भुवि ॥२९॥
यामाराध्य हरो हरत्वमभजद् विष्णुस्तु विश्वात्मतां,
चक्रे सृष्टिमजोऽप्यवोचदखिलं वेदादिसद्वाङ्मयम् ।
ध्यात्वा ध्वान्तमशेषमाशु हरते सूर्योऽपि पीताम्बरे ।
तीव्रं तापमपाकरोति रजनीनाथोऽपि चूडाश्रितः ॥३०॥

---

१. स्थैर्यं । २. समस्तं । ३. पीतेन्दु० । ४. ०भरितं विम्बं । ५. ०दर्पाधिकाम् ।
६. '—' संस्थिताऽसि बगले ते विश्वरक्षाक्षमाः । ७. सततं ।

बुद्धिं नाशय कीलयाशु[1] रसनामङ्घ्र्योर्गतिं स्तम्भय,
दुष्टान् द्रावय मारयारिनिवहान् दासांश्चिरं पालय ।
इत्थं ये बगलामुखीं पदगतिं लब्ध्वा पठिष्यन्ति ते,
यन्त्रारूढमिवारिवृन्दमखिलं कर्त्तुं समर्थाः सदा ॥३१॥

ध्यात्वा त्वां बगले ! पुरा गिरिसुता चक्रे शिवं स्वं वरं,
प्रोक्तं नार्पयितुं शिवेन गदिता संकल्पनाम्नौ तदा ।
[2]त्यक्ताग्निर्गलितावलिं गिरिसुतात् त्यक्त्वा गलस्तन्मुखात्,
तस्मात् त्वं बगलामुखी निगदिता नित्या परा योगिनी ॥३२॥

[3]नागेन्द्रैर्देवसिद्धैर्मुनिवरनिवहैर्दानवै राक्षसेन्द्रै-
र्दिक्पालैर्दिक्करीन्द्रै दिनकरप्रमुखैः सद्ग्रहैस्तारकाद्यैः ।
ब्रह्माद्यैः स्थूलसूक्ष्मैरविदितमुदिता त्वं परा चोन्मनी त्वं,
नित्या पीताम्बरा त्वं रिपुभयशमनी भक्तिचित्तासनस्था[4] ॥३३॥

[5]शम्भुर्यद्गुणगाननोद्यतमतिर्नाटयोत्सवैस्ताण्डवे,
चक्रे चन्द्रमयूखकम्पनकरां[6] नीराजनां[7] पादयोः ।
[8]हेमाम्भोजदलैर्जटाजलभरैरानन्दितैर्मौलिभिः[9],
पूजां प्रत्यहमातनोति नटयन् स्वैर्हस्ततालादिभिः ॥३४॥

यां दध्रे चतुराननोऽपि वदने चित्तारविन्दस्थितां,
यां वक्षःस्थलसंस्थितां हरिरजामालिङ्ग्य पीताम्बराम् ।
यद्देहार्धमुरीचकार पुरजित्[10] सौन्दर्यसाराधिकां,
षट्चक्राक्षररूपिणीं भज सखे ! देवीं जगत्पालिकाम्[11] ॥३५॥

हस्ते भाति गदा सदार्त्तिशमनी रत्नावली त्वङ्गजे,
पादे नूपुरमीशमौलिमणिभिर्नीराजितं[12] राजते ।
ताटङ्कं श्रवणे कुचोपरि सदा[13] कस्तूरिकालेपनं,
काश्मीरद्रवमङ्गरागमधिकां पीतच्छविं[14] तन्वते ॥३६॥

ॐकारद्वयसम्पुटेन पुटितां 'विद्यागमे संस्थितां,'[15]
षट्चक्राक्षरबीजसाररचितां षट्त्रिंशवर्णात्मिकाम्[16] ।

---

१. ख.कीलयारि । २. त्यक्त्वा० । ३. नागेन्द्रैर्देवसंघैर्मुवि० । ४. भक्त० । ५. ०गुणगानतत्परमतिर्नित्योत्सवे । ६. ०कम्पनमिवा । नीराजनं । ८. हेमाम्भोजजलै० । ९. मन्विता मौलिभिः । १०. पुरभित् । ११. जगद्व्यापिकाम् । १२. ०नीराजनं । १३. ललत् । १४. पीतां छविं । १५. विद्यामजास्ये स्थितां । १६. ससत्ववर्णात्मिकाम् ।

'ये जानन्ति जपन्ति सन्ततमभिध्यायन्ति गायन्ति वा,
ते वन्द्या विबुधैश्चरन्ति भुवने सिद्धार्चिताः सिद्धये'[1] ॥३७॥

स्वाहाशक्तिरुपासने तव ऋषिः श्रीनारदो देवता,
नित्या श्रीबगलामुखी निगदिता छन्दो भवेत् त्रिष्टुभम् ।
बीजं तु स्थिरमायया विरचितं नानाविधस्तम्भने,[2]
प्रोक्तं पद्मभुवाऽखिलाप्तिविनियोगोऽप्यच्युताकारता[3] ॥३८॥

हृद्यं सर्वसुरेश्वरैश्च ऋषिभिर्दुष्प्राप्यमेवाद्भुतं,
स्तोत्रं गोप्यतमं स्वभाग्यवशतः प्राप्त[4] पठिष्यन्ति ये ।
सूक्त्या[5] देवगुरुं 'धनेन धनदं'[6] जित्वा चिरञ्जीविता,
षण्मासात् सुखसागरे शिवसमाक्रीडां करिष्यन्ति ते ॥३९॥

देवी स्वप्नगता स्वयैव लिखितं मह्यं ददावद्भुतं,
दिव्यास्त्रं पुरतः पठस्व विमलं सिन्दूरवर्णैः करैः ।
रोमाञ्चाङ्कितहर्षमाप्य लुलितैरङ्गैः[7] पठन्तं नर-
प्राप्तोऽहं परमोदयप्रदमिदं ज्ञानं कवीन्द्रादिदम्[8] ॥४०॥

प्राप्ता श्रीबगलामुखीवदनतः स्वप्ने सुविद्या मया,
षट्त्रिंशद्भिरिमैः सुवर्णनिचयैः सद्बीजरत्नावली ।
येषां कण्ठगता विभाति जगतीपीठे प्रयोगक्षमा,
वश्याकर्षणमोहमारणविधौ स्तम्भे तथोच्चाटने ॥४१॥

चलत्कनककुण्डलोल्लसितचारुगण्डस्थलाम्,
लसत्कनकचम्पकद्युतिविराजिचन्द्राननाम् ।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां,
स्मरामि बगलामुखीं विमुखवाङ्मुखस्तम्भिनीम्[9] ॥४२॥

॥ श्रीपीताम्बरारत्नावलीस्तोत्रम् सम्पूर्णम् ॥[10]

संवत् १८९० शाके १७५५ आषाढमासे शुक्लपक्षे ५ मंदवासरे लिखितं ब्रह्मचारि-काशिनाथेन ॥ श्रीगङ्गाविश्वेश्वराभ्यां नमः ॥

---

१. ख. पादद्वयं एकचत्वारिंशच्छ्लोकादनन्तरं विद्यते । २. नानाविधि० । ३. ०प्यसत्कारकः । ४. नित्यं । ५. शस्त्या । ६. धनैर्धनपतिं । ७. ललितै० । ८. कवीन्द्रार्चितम् । ९. ख. श्लोकोऽयं नास्ति । १०. इति श्रीनारदोक्तं पीताम्बरादेवीस्तवराजस्तोत्रम् ।

सांख्यायनतन्त्रस्थानाम्

पद्यानामनुक्रमः

पृष्ठाङ्क पद्याङ्क

ओ

क

ख

ग

द

ध

न